Not noticed by Burnell. No. 16061. Palm leaf. $15\frac{1}{2} \times 1\frac{1}{8}$ inches. Leaves—37 (1-17, 1-16, 2, 2). Lines—5 to a Page. Grantha. No. of Granthas—450. Complete. Not printed.

Beginning:

नमः सुरवरेशाय वरदाय यशस्विने ।
इन्द्राय वज्रहस्ताय युद्धस्थ ॥........

चन्द्राचलकुन्दचन्दनसुधागौरोन्नतैरावृतं

स्कन्दारोहणगर्वतोऽर्पितमतिं वन्द्यं च वृन्दारकैः ।

गाढालिङ्गन......पीनोरुचारुस्तन-

क्रीडादुर्ललितं हरान्तिकरं वन्दे महेन्द्रं सदा ॥

End:

दद्याद्वै वासुदेवेन ग्रामादीनां प्रवृत्तये ।

वृषस्य भवनं पश्चाचीर्थस्थानं समाचरेत् ॥

Colophon:

इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे चूर्णोत्सवपटलः ।

Remarks:—The Ms. is in good condition. This is also one of the accepted Śaivāgamas but this Ms. is an incomplete one.

DĪPTAŚĀSTRAM—PRATIṢṬHĀTANTRAM.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15267	B. L. 11066	Pl.	Gr.	Incomplete (Pratiṣṭhā)
15268	„ 3654 d	P.	De.	„ (Maṇṭapaprākāra)

॥ मकुटागमः ॥

15269. MAKUṬĀGAMAḤ.

Burnell's Catalogue No. 11428. Paper. $17\frac{1}{2} \times 1$ inches. Leaves—87. Lines—4 or 5 to a Page. Grantha. No. of Granthas—2000. Incomplete. Not printed.

Beginning:

स्कन्दाय नमः । गुहाय नमः । षण्मुखाय नमः ।

प्रभवे नमः । पिङ्गलाय नमः । कृत्तिकासूनवे नमः ।

शिखिवाहनाय नमः । द्विषड्भुजाय नमः । द्विषण्णेत्राय

नमः । शक्तिधराय नमः ।

End:

केकाणकुण्डयं तदेकाग्निकुण्डादाक्षिण्यदिक्षु समिधा जुहुत्वा ।
पूर्वादिकुण्डान्तं यथाक्रमेण पश्चादिकुण्डं तु प्रधानवृत्तम् ॥
अर्घ........... । देवसो देवता द्रव्यं नैवेद्यं च निवेदितम् ।
चण्डद्रव्यं च निर्माल्यं निर्माल्यं षड्विधं भवेत् ॥ शुभमस्तु ॥

Remarks:—The Ms. is in a fairly good condition. Dr. Burnell thinks that this work deals with ritual to be observed in the big temple at Tanjore.

॥ विजयतन्त्रम्—रथलक्षणम् ॥

15270. VIJAYATANTRAM—RATHALAKṢAṆAM.

Burnell's Catalogue No. 11072. Palm leaf. $14\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—46 (1-46 out of 49). Lines—7 or 8 to a Page. Grantha. No. of Granthas—1100. Vijaya. Incomplete. Not printed,

Beginning:

वक्ष्येते रथमानं च लक्षणं विधिना सह ।
देवानां मानुषाणां च....रथारोहणार्थिकम् ॥
पत्रकल्पं रत्नकल्पं चित्रकल्पमिति त्रिधा ।
पत्रकल्पं तु देवानां रत्नकल्पं तु भूसुरे ॥
भूपतेश्चित्रकल्पं स्यात्सर्वयोग्यं तु....... ।

End:

परिदिनं तु दशरुद्रभानुकैः पञ्चनन्दवसुसप्तवारकम् ।
सप्त चाष्टगुणनन्दसप्तकैर्हानिरंशविधि...... ॥
अग्निरष्टगुणपक्षहानिकैः परिधिरावृतिरितीह कथ्यते ॥
शांकं कलार्जुनोनिमयोमघमधु... (?)।

Colophon: (Leaf 26)

इति विजयतन्त्रे प्रतिष्ठापादे क्रियातन्त्रे दारुसंग्रहणविधिपटलः ॥

Colophon: (Leaf 14)

इती...शास्त्रे वास्तुबोधायनीये यानाधिक....चतुर्दशोऽध्यायः ॥

Colophon: (Leaf 24)

विजयतन्त्रे + रथसंग्रहणविधिः ॥

Remarks:—The Ms. is in a decaying condition. This also is one of the 28 Śaivāgamas and the Ms. represents only a portion.

॥ शिवानुभवसूत्रम्—वातूलोत्तरतन्त्रम् ॥

15271. ŚIVĀNUBHAVASŪTRAM—VĀTŪLOTTARATANTRAM.

Burnell's Catalogue No. 3650. Paper. $14\frac{3}{8} \times 5\frac{1}{4}$ inches. Sheets—26. Lines—8 to a Page. Devanāgarī. No. of Granthas—520. Māyīdeva. Complete. Printed.

Remarks:—The Ms. is in good condition. This is said to be second part of Vātūlāgama but does not seem to be the same as stated in the above No. This is separately published under the name Anubhavasūtra at Sholapur in the Vīra Śaiva Liṅga Brāhmaṇadharma Granthamālā in 1909 edited by Mallikārjuna Śāstrin. The author gives a complete list of his ancestors as follows :—

Somanātha
|
Upamanyuśivācārya
|
Bhīmanātha
|
Kāleśvaramahādeva
|
Boppanātha
|
Nākarāja
|
Saṃgameśvara
|
Māyīdeva.

The author mentions Aipurī as his place of residence.

॥ वातूलशुद्धागमः ॥

15272. VĀTŪLAŚUDDHĀGAMAḤ.

Burnell's Catalogue No. 11384. Palm leaf. 18½+1½ inches. Leaves—24. Lines—5 to a Page. Telugu. No of Granthas—700. Complete. Printed.

Remarks:—The Ms. is in good condition. This Āgama is composed of 2 parts of 10 paṭalas each. This is the first of them. This along with the second part is published at Madras with a commentary in 1911 edited by Mr. Arayappa Mudaliar, This is also one of the 28 recognised Śaiva Āgamas.

VĀTŪLAŚUDDHĀGAMAḤ.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15273	B. L. 11385	Pl.	Gr.	Complete.
15274	Ms. 16062	P.	De.	Incomplete.
15275	B. L. 6999	,,	,,	,,

॥ संतानसंहिता ॥

15276. SAṂTĀNASAṂHITĀ.

Burnell's Catalogue No. 11408. Palm leaf. 15×1½ inches. Leaves—217 (1-83, 177-187, 153-165). Lines—4-6 to a Page. Grantha. No. of Granthas—2500. Incomplete. Not printed.

Beginning:

ॐ कैलासपीठमध्यस्थं हरं सुरवरार्चितम् ।
यक्षैश्च ऋषिभिः साध्यैर्देवैर्भूतैरनेकशः ॥
प्रणिपत्य जगन्नाथं देवी वचनमब्रवीत् ।

अष्टात्रिंशतिभेदेन शैवभेदो विधीयते ॥
इदानीं श्रोतुमिच्छामि संतानसंहितावरम् ।
ज्ञानचर्याक्रियायोगं ब्रूहि मे परमेश्वर ॥

End:

तं विदित्वा महादेवि श्वपचानपि दीक्षयेत् ।
आदिशैवमिति प्रोक्तं तत्र स्नेहाद्विशेषतः ॥
दीक्षोपक्र......आचार्याय प्रदापयेत् ।
दीक्षाभिषेकमेवोक्तं पवित्रारोहणं श्रृणु ॥

Colophon:

इति संतानसंहितायां क्रियापादे दीक्षा........अष्टषष्टितमः पटलः ॥

प्रश्नपटलः । लिङ्गोत्पत्तिः । कर्षणम् । प्रथमेष्टिका । प्रासादलक्षणम् । मूर्धेष्टिका । शिलाग्रहणम् । पादशिला । प्राकारविधिः । मण्टपविधिः । वाह्यपीठम् । परिवारविधिः । वृषभलक्षणम् । प्रतिमालक्षणम् । अक्षरकल्पविधिः । मन्त्रोद्धारः । शिवलिङ्गस्थापनम् । चललिङ्गस्थापनम् । प्रतिमास्थापनम् । शूलस्थापनम् । प्रासादस्थापनम् । ऋषभस्थापनम् । अग्निस्थापनम् । मातृस्थापनम् । विघ्नेशस्थापनम् । कुमारस्थापनम् । ज्येष्ठास्थापनम् । दुर्गास्थापनम् । आदित्यस्थापनम् । चण्डेशस्थापनम् । विष्णुस्थापनम् । आगमप्रतिष्ठा । गौरीप्रतिष्ठा । मानुषस्थापनम् । सहस्रस्नपनम् । पञ्चशतस्नपनम् । पञ्चाशद्विशतम् । अष्टोत्तरशतस्नपनम् । एकाशीतिस्नपनम् । एकोनपञ्चाशत्स्नपनम् । पञ्चविंशतिस्नपनम् । नवकलशस्नपनम् । पञ्चकलशस्नपनम् । स्नानम् । भस्मस्नानम् । कार... । अर्चनम् । मुद्रालक्षणम् । नैवेद्यम् । अग्निकार्यम् । आचार्यलक्षणम् । शीतकुम्भम् । पवित्रम् । शिवदीक्षा । नित्योत्सवः । अमावास्यार्चनम् । अङ्कुरार्पणम् । गृहयज्ञः । प्रायश्चित्तम् । आचार्यलक्षणम् । पाषाणप्रत्ययः । परशुप्रत्ययः । सत्यप्रत्ययः । अक्षताशनम् । कुम्भस्थापनम् । रक्षादीपः । कृत्तिकादीपः ।

अद्भुतशान्तिः । बालालिङ्गलक्षणम् । दीक्षामण्डपम् । वास्तुपूजा । शिवदीक्षा । सूर्यस्थापनम् ।

Remarks:—The Ms. is in good condition. This is one of the 28 Saivāgamas.

॥ सुप्रभेदतन्त्रम् ॥

15277. SUPRABHEDATANTRAM.

Burnell's Catalogue No. 11402. Palm leaf 18×10½ inches, Leaves—61. Lines—7 to a Page, Grantha. No. of Granthas—4500. Incomplete.

1 चर्यापादः । 2 ज्ञानपादः । 3 क्रियापादः । 4 योगपादः ।

The fourth pāda is not complete.

Remarks:—The Ms. is in good condition. This is published at Madras in 1901 under the name Suprabhedāgama.

SUPRABHEDATANTRAM—KRIYĀPĀDAḤ.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15278	B. L. 11403	Pl.	Gr.	Incomplete.
15279	„ 11412	„	„	„ Fragment.
15280	„ 3654 b	P.	De.	„
15281	„ 11086	Pl.	Gr.	„

॥ सूक्ष्मतन्त्रम्—कामकोष्ठपटलः ॥

15282. SŪKṢMATANTRAM—KĀMAKOṢṬHAPAṬALAḤ.

Not noticed by Burnell Ms. No. 3657b. Paper. 18×6½ inches. Sheets—17 (73-89 out of 97). Lines—11 to a Page. Devanāgarī. No. of Granthas—375. Sūkṣma. Complete. Not printed.

Beginning:

विमानलक्षणं चैव संक्षेपाद्वक्ष्यतेऽधुना ।
तैतलानां द्विजातीनां वर्णानां वासयोग्यकम् ॥

* *

लुपमानं क्रमं सर्वं स्थूपिकास्थापनं क्रमात् ।

End:

एवं प्रत्यहमभ्यर्च्य यथावित्तानुसारतः ।
एवं यो ज्ञापते मर्त्यः स पूर्णाङ्गमवाप्नुयात् ॥

Colophon:

इति सूक्ष्मशास्त्रे कामकोष्ठपटलः । इति मध्यार्चनम् ।

Remarks:—The Ms. is in good condition, This is one of the accepted 28 Śaivāgamas.

॥ पाद्मसंहिता—कामकोष्ठलक्षणम् ॥

15283. PĀDMASAMHITĀ—KĀMAKOṢṬHALAKṢAṆAM.

Not noticed by Burnell. Ms. No. 3657c. Paper. 13×6½ inches. Sheets—3 (89-91). Lines—11 to a Page. Devanāgarī. No. of Granthas—55. Complete. Not Printed.

Beginning:

अथ वक्ष्ये विशेषेण कामकोष्ठस्य लक्षणम् ।
योगं भोगं च वीरं च शक्तिबीजमिति त्रिधा ॥
योगं शक्तिरुमाभागं पीठाकृतितुरुच्यते ।
उपानं जगतीश्चैव मूर्धुदाङ्कं प्रकर्णकम् ॥

End:

बाह्योसलादिरिविदिमं समञ्चैव कटकं कर्तरीदम् ।
बीजापूरं च पद्मं च खड्गं चक्रं धरोमिव(?) ।

इच्छाशक्तियमज्ञानशक्तियमाक्रिया-

शक्तियमचसान्तर्लिंगे चालायान्तर्गतः स्यात् ।

बाह्ये सालादिग्विदिक्ष्वष्टदेशे

तन्मध्ये स्थापयेत्कामकोष्ठः ॥

Colophon:

इति पाद्मसंहितायां रौरवभेदे कामकोष्ठलक्षणपटलः ।

Remarks:—The Ms. is in good condition. This is a Saṃhitā belonging to Rauravāgama. There is another Pādmasaṃhitā belonging to Pāñcarātrāgama. A portion of Rauravāgama is printed with a commentary at Benares edited by J. J. Jhonson in 1908.

॥ कामकोष्ठाविधिः ॥

15284. KĀMAKOṢṬHAVIDHIḤ.

Not noticed by Burnell. Ms. No. 3657d. Paper. 13×6½ inches. Sheets—5 (91-95). Lines—11 to a Page. Devanāgarī. No. of Granthas—100. Incomplete. Not printed.

Beginning:

शिवमध्यार्जुनाभ्यां नमः ॥

अथातः संप्रवक्ष्यामि कामकोष्ठस्य लक्षणम् ।

उद्देशे पूर्वतः कृत्वा पश्चान्निर्देशमानकम् ॥

End:

त्रिधावरणं श्रेष्ठं द्वितीयां मध्यमं तथा ।

अन्तर्वा मध्यमं विद्यात्तत्स्थानं भवनं क्रमात् ।

सालाभ्यन्तरके वा स्याद्द्वात्रिंशद्देवताः क्रमात् ॥

Remarks:—The Ms. is in good condition. It is not known from which Āgama this is.

॥ आगमदीक्षाविधिः—आगमाह्निकम् ॥

15285. ĀGAMADĪKṢĀVIDHIḤ—(ĀGAMĀHNIKAM).

Burnell's Catalogue No. 11390. Palm leaf. 16×1¼ inches. Leaves—26. Lines—4 or 5 to a Page. Grantha. No. of Granthas—1300. Aghoraśivācārya. Incomplete. Not printed.

Beginning:

प्रणिपत्य महेशानं.......... ।

.........दीक्षाविधिरुच्यते ॥

अथ यथोक्तलक्षण आचार्य उक्तलक्षणं शिष्यं लब्ध्वा विहितकाले विहितदेशे यागाङ्गानि द्रव्याणि संपाद्य मण्डपादि यथोक्तलक्षणं विधाय कृतनित्याह्निकद्वयः ॥

End:

कपिलायाः....क्षीरमाप्यायस्वेति मन्त्रतः ।

श्वेताया दधि च ग्राह्यं दधिक्राव्णेति मन्त्रतः ।

ग्रा....न्तु रक्तायाः शुक्रमसीति मन्त्रतः ।

उक्तवर्णगवाभावे यथासंभव.......

..........सद्योजातादिभिः क्रमात् ।

.........संगृह्य चैकस्मिन्कलशे जपेत् ॥

Remarks:—The Ms. is in good condition. It deals with the rituals at the time of initiation. The following are some of the topics dealt with in the Ms.

आगमप्रतिष्ठाविधिः । रौरवे प्रतिष्ठातन्त्रे पाषाणस्थापनविधिपटलः । ईशादिकुम्भस्थापनक्रमः । मृतकदीक्षा । पाषाणस्थापनविधिः । दीक्षाविधिः । निवृत्तिकलाशोधनम् । रक्षाबन्धनसूत्रविधिः । पञ्चगव्यविधिः । For remarks about the author see under No. (8187 Vol. XIV).

ĀGAMĀHNIKAM.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15286	B. L. 11391	Pl.	Gr.	Incomplete.

॥ उत्सवपद्धतिः ॥

15287. UTSAVAPADDHATIḤ.

Burnell's Catalogue No. 11036d. Palm leaf. 13 × 1¾ inches. Leaves—1-14. Lines—8 to a Page. Grantha. No. of Granthas—220. Complete. Not printed.

Beginning:

नत्वानाद्यन्तसर्वार्थेन्द्रियक्रियं परमेश्वरम् ।

शिवात्मा यातु............॥ (?)

योगाविशेषः स च त्रिविधो नित्यनैमित्तिककाम्यश्चेति ।

तत्र नित्यानित्यपूजाङ्ग.........

End:

मौनमास्थाय ग्रामादिकं गत्वा शकटबलिं भूमौ

निक्षिप्य तत्स्थानात्पूर्वभूतदेवान्संविसृज्य बलिं निक्षिपेत् ॥

Colophon:

उत्सवपद्धतिः समाप्ता ॥

Remarks:—The Ms. is in a fairly good condition.

॥ क्रियाक्रमद्योतिका ॥

15288. KRIYĀKRAMADYOTIKĀ.

Burnell's Catalogue No. 11377. Palm leaf. 10½ × 1½ inches. Leaves—166 (131-148 not available). Lines—7 or 8 to a Page. Grantha. No. of Granthas—2500. Aghoraśivācārya. Incomplete. Not printed.

Beginning:

वन्दे विश्वाधिकं शान्तमनादिनिधनं शिवम् ।
निष्कलं निष्कलङ्कं च...शक्तिक्रियात्मिकाम् ॥
गुरून्परंपरां नत्वा गुरुवंशक्रमागतान् ।
क्रियाक्रमद्योतिकेयं नित्यादेः क्रियते स्फुटम् ॥
प्रातःसमयात्पूर्वं पञ्चनाडिकावच्छेदे समुत्थाय....

End:

ततः स्नात्वा जलं दत्त्वा जपेदेकादशात्मकम् ।
अनध्यायोचितं कालं कर्म नैमित्तिकं त्यजेत् ॥

Colophon:

इति परमेश्वरापरनामधेयश्रीमदघोरशिवाचार्यविरचितायां क्रियाक्रमद्योतिकायामन्त्येष्टिविधिः समाप्तः ॥ शुभमस्तु ॥

Remarks:—The Ms. is in good condition. This seems to be a comprehensive work dealing with the daily routine of the followers of Śaivāgamas and this Ms. contains the following topics.

सन्ध्याक्रमः । सूर्यपूजा । शिवपूजा । वास्तुशान्तिः । अङ्कुरार्पणम् ।
कौतुकबन्धनम् । समयदीक्षादि । कलादिनिरूपणम् । चूर्णोत्सवः, ।
अन्त्येष्टिः ।

Three sections from this work on Śaiva rituals are published at Madras in 1904 edited by Ṣaṇmukhasundara Mudaliar. For particulars about the author see remarks under No. 8187 (Vol. XIV).

KRIYĀKRAMADYOTIKĀ.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15289	B. L. 11378	Pl.	Gr.	Incomplete
15290	„ 11379	„	„	„
15291	„ 11380	„	„	„
15292	„ 11394	„	„	„ (with Tamil meaning)
15293	„ 11395	„	„	„

॥ ज्ञानसारावली ॥

15294. JÑĀNASĀRĀVALĪ.

Burnell's Catalogue No. 11406. Palm leaf. 18½ × 2¾ inches. Leaves—27 (1-30) Lines—10-11 to a Page. Telugu. No. of Granthas—1600. Incomplete. Not printed.

Beginning:

...स्थगुणगणाभिधा....स्थूलरूपा जाताः ॥ १० ॥

मूलम् ॥ ज्ञानात्केवलिषु स्थितेषु परतो ग्रन्थैश्च कांश्चित्पती-
न्मन्त्राणां मलपाकयोगसदृशान्मन्त्राञ्छिवोन्यान्गुरून् ।
कृत्वा शुद्धपथे शुचौ लयकलान्सूक्ष्माङ्ककानीश्वरो
रुद्रांश्चापि विधाय देहपुरगाञ्छिष्टान्विधत्ते भवे ॥

व्याख्या ॥ इत्थं षट्त्रिंशत्तत्त्वोत्पत्तिं प्रदर्श्य तत्र स्थि-
तानन्नादीन्वक्तुमाह ॥

End:

द्विसंख्यानां पदानां च न्यासः प्रोक्तो यथाक्रमम् ।
द्विसंख्यपदमध्ये च न्यासमेकेन कारयेत् ॥ इति ।
शान्त्यतीतायां शिवेनास्त्रमन्त्राः । शान्तिकायां तत्पु-
रुषमन्त्रैकवक्त्रा(?)विद्यायां शिलाघोरेण प्रतिष्ठायां शिरोवा-
मे निवृत्तिकलायां सद्योजातहृदयमन्त्रा इति षडङ्गन्यास-
क्रमः ॥ ४८ ॥

Colophon: (Leaf No. 15)

इति ज्ञानपादः समाप्तः ॥

Remarks:—The Ms. is in good condition. At the beginning there are 3 leaves of some Dharma Śāstra fragments. It may also be a fragment dealing with Śivapūjākrama. The other work contained herein is Vedāntanāmaratnasahasravyākhyā.

॥ नित्यपूजाविधिः ॥

15295. NITYAPŪJĀVIDHIḤ.

Burnell's Catalogue No. 3639. Paper. 13¾×6 inches. Sheets—27. Lines—10 to a Page. Devanāgarī. No. of Granthas—800. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥ हरिः ॐ ॥

बालो तरुणशक्तिश्च वीरः शक्तिर्द्विजस्तथा ।

ऋद्धिरुच्छिष्टविघ्नेशः क्षिप्रो हेरम्बनामकः ॥

लक्ष्मीगणमहाविघ्नो विजयः कल्पहस्तकः ।

ऊर्ध्वविघ्नेशपर्यङ्कः पर्यन्तोनामधेयकः ॥

एतेषां प्रतिरूपाणां ध्यानानामधुनोच्यते ।

End:

देवेन सहिता वापि केवलं च प्रकीर्तिताः ॥

एकासने च दिव्ये च एकमूर्तिं विभावयेत् ॥

Colophon:

नित्यपूजापद्धतिः समाप्ता ॥ हरिः ॐ ॥ शुभमस्तु ॥

Remarks:—The Ms. is in good condition. This is full of scriptorial blunders.

NITYAPŪJĀVIDHIḤ.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15296	Ms. 11086	Pl.	Gr.	Incomplete,

॥ पञ्चशास्त्रागमः ॥

15297. PAÑCAŚĀSTRĀGAMAḤ.

Burnell's Catalogue No. 12187. Palm leaf. 17½×1½ inches.

Leaves—1-24. Lines—6-8 to a Page. Telugu. No. of Granthas—550. Incomplete. Not printed.

Beginning:

कुलदैवतमस्मदीयमास्ते परमानन्दमयं कदम्बमूले ।

कुटिलेन्दुललामवेणिवीणाशुकनानामणिकङ्कपत्रचिह्नम् ॥

पार्वत्युवाच ॥

End:

क्लीं ह्रीं सर्वलोकपदरञ्जनी नमः स्वाहा ।

Colophon:

इति सुरेन्द्रसंहितायां पञ्चशास्त्रागमे द्वाविंशतितमः पटलः ॥

Rmarks:—The Ms. is in a decaying condition. This is an extract from Surīndrasaṃhitā.

॥ मण्टपार्चनविधिः ॥

15298. MAṆṬAPĀRCANAVIDHIḤ.

Burnell's Catalogue No 3640. Paper. 14⅓ × 5⅓ inches. Sheets—8. Lines—9 or 10 to a Page. Devanāgarī. No. of Granthas—280. Incomplete. Not printed.

Beginning: श्रीगणेशाय नमः ॥

मण्टपार्चनविधिं व्याख्यास्यामः । मण्टपोक्तप्रकारेण मण्टपनिर्माणं मण्टपालंकारं कृत्वा । वास्तुपूजापर्यग्निकरणं कृत्वा ॥

End:

नर्मदादेविकायां च गङ्गाया यमुनैस्तथा ।

अन्यपुण्यनदीमध्ये सन्ति बाणमुदाहृतम् ॥

तपश्चचार बाणोऽपि लिङ्गार्थं पूजनं प्रति ।

तत्तपोवीर्यभावेन स्थितं बाणमुदाहृतम् ॥

Remarks:—The Ms. is in good condition. The Ms. is full of scriptorial blunders and is a compilation.

॥ शिवज्ञानबोधवृत्तिः ॥

15299. ŚIVAJÑĀNABODHAVṚTTIḤ.

Burnell's Catalogue No. 11413. Palm leaf. 16⅓ × 1½ inches. Leaves—12 (193-204). Lines—5 or 6 to a Page. Telugu. No. of Granthas—275. Dakṣiṇamūrti. Complete. Not printed.

Beginning:

विघातपादपोन्मूललीलानुभवलिप्सया ।
वन्दे मातङ्गभावेन क्रीडन्तं गणनायकम् ॥
सदाशिवपदोर्ध्वस्थचिदम्बरसभान्तरे ।
भावयामः परं ज्योतिः परमानन्दताण्डवम् ॥

इह खलु द्वादशसूत्रात्मके श्रीरौरवतन्त्रान्तर्गते श्रीशिवज्ञानबोधे शैवसिद्धान्तसर्वस्वसंग्रहे प्रथमसूत्रद्वयेन प्रतिपदार्थो निरूप्यते । स्त्रीति ॥

End:

॥ एवं विद्यादिति ॥ शिवज्ञानबोधे शिवज्ञानस्य शिवज्ञास्त्रस्य बोधो ऽयेन(?) तस्मिञ्छिवज्ञानबोधनामके तन्त्रसारे ग्रन्थ एव...

Colophon:

दक्षिणामूर्तिनाम्ना ज्ञानदेवमुनिना शिवज्ञानबोधस्य वृत्तिः कृता ।

इति श्रीव्याघ्रपुरवासनिगमज्ञानदेवविरचितशिवज्ञानबोधोपन्यासः समाप्तः ।

Remarks:—The Ms. is in a decaying condition.

॥ शिवधर्मः ॥

15300. ŚIVADHARMAḤ.

Burnell's Catalogue No. 9470 (a) Palm leaf. 9½ × 1 inches. Leaves—99-150. Lines—10 to a Page. Grantha. No. of Granthas—900. Nandikeśvaraḥ, Complete. Not printed.

Beginning:

शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु शान्तिं सर्वत्र सुखी भवतु लोकः ॥

श्रीनन्दिकेश्वर उवाच—

अतः परमिदं गुह्यं रुद्रोद्गीर्णं महोदयम् ।
महाविघ्नप्रशमनं महाशान्तिकरं शुभम् ॥

* * *

सर्पशान्त्यधिकाराख्यं धर्मं वक्ष्यामि तत्त्वतः ॥

End: (Sheets 147)

इत्येवं शान्तिकाध्यायं यः पठेच्छृणुयादपि ।
विधूय सर्वपापानि शिवलोके महीयते ॥

* *

शान्त्यध्यायमिदं पुण्यं न देयं यस्य कस्यचित् ।
शिवभक्ते सदा देयं शिवेन कथितं पुरा ॥
नित्यमूर्जितशक्तिश्च शक्तिव्याघातवर्जितः ।
सर्वकामसमृद्धः स्याद्यः पठेत्तु दिने दिने ॥

Colophon:

इति शिवधर्मशास्त्रे नन्दिकेश्वरप्रोक्ते शान्त्यध्यायो नाम षष्ठः ॥

शिवमस्तु सर्वजगतां + सर्वत्र सुखी भवतु लोकः ॥ गुरुभ्यो नमः ॥

Remarks:—The Ms. is in a fairly good condition.

This Ms. contains also

अमावास्यातर्पणविधिः, आदित्यहृदयम् ।

SIVADHARMAH.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15301	B. L. 9485(a)	Pl.	Gr.	Incomplete VI.

॥ शिवप्रतिष्ठाविधिः ॥

15302. ŚIVAPRATIṢṬHĀVIDHIḤ.

Burnell's Catalogue No. 3647. Paper. $14\frac{1}{2} \times 5\frac{1}{2}$ inches. Sheets—118. Lines—10 to a Page. Devanāgarī. No. of Granthas—3000. Incomplete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥

अभयवरदपाणिं ह्यर्कचन्द्राग्निनेत्रं
स्फटिककिरणगात्रं भस्मरुद्राक्षभूष्यम् ।
मकुटसलिलचन्द्रं चाम्बरे व्याघ्रचर्म
गगनवदनसौम्यं नतमीशानरूपम् ॥ १ ॥

तत्पुरुषम्

कुलिशवरदहस्तं कुङ्कुमाभं त्रिनेत्रं
नलिनवदनशोभं नागगङ्गेन्दुमौलिम् ।
उदयकिरणवर्ज्ञं दिव्यरुद्राक्षदामं
शयनपुरुषशान्तं कर्मसादाख्यरूपम् ॥

End:

'सामान्याग्निस्वरूपं तु विन्यसेदीशकुण्डले' इति ध्यात्वा ॥
ॐ ह्रीं शिरसे कवचाय स्वाहा । इति शिवयागनवकुण्डहोमं प्रधानकुण्डे नेत्रास्त्रं हुत्वा ॥ श्रीधर्मसंवर्धनीसमेतप्र-

णतार्तिहरस्वामिने नमः ॥

Colophon: (Sheet No. 34)

इति कारणे प्रतिष्ठातन्त्रे अघोरविरचितायां कर्मारम्भविधिः समाप्तः ॥

Colophon. (Sheet No. 109)

(कामिके) इति शिवमण्डपपूजाविधिः ॥

The following are the topics dealt with:—

ब्राह्मणानुज्ञा । विधानम् । देवतास्थापनम् । आचार्यलक्षणम् । आशौचनिर्णयः । यागमण्डपलक्षणम् । कुण्डलक्षणम् । कुम्भादिलक्षणम् । पवित्रलक्षणम् । नागपवित्रलक्षणम् । कूर्चलक्षणम् । प्रोक्षणकूर्चलक्षणम् । परिस्तरणलक्षणम् । ब्रह्मकूर्चलक्षणम् । कुम्भपरिस्तरणलक्षणम् । कुम्भालङ्कारदर्भाः । ज्ञानखड्गलक्षणम् । उत्पवनपवित्रलक्षणम् । मुष्टिदर्भलक्षणम् । यागशालालक्षणम् । वपनविधिः । नारिकेलविधिः । उत्तममध्यमाधमपक्षः । कर्मारम्भलक्षणम् । अधिदेवतावचनम् । अनुज्ञा, पुण्याहवाचनम् । प्रथमारम्भपुण्याहवाचनविधिः । पात्रपूजा । वास्तुमण्टपलक्षणम् । प्रवेशबलिः । कर्मारम्भविधिः । भूतशुद्धिः । दहनप्लावने । अक्षरन्यासः । अन्तर्यागः । पञ्चासनाद्यर्चा । अष्टमूर्त्यादिपूजाविधानम् । वास्तुपूजाविधानम् । मन्त्रशुद्धिः । द्रव्यशुद्धिः । अष्टकुम्भाद्यर्चनप्रकारः । वास्तुहोमप्रकारः । कूष्माण्डबलिः । अन्तर्बलिबहिर्बलिप्रकारः । विघ्नेश्वरपूजादिमृत्संग्रहणविधिः । अङ्कुरार्पणाविधिः । रक्षाबन्धनविधिः । अधिवासनाविधिः । अष्टात्रिंशत्कलान्यासः । जीवन्यासादिप्राणप्रतिष्ठा । कलाध्वा । पृथिवीतत्त्वे भुवनाध्वा । वर्णाध्वा । हृदयादिन्यासविधानम् । षट्त्रिंशत्तत्त्वन्यासः । एकपञ्चाशदक्षरन्यासः । भुवनम् । मन्त्रन्यासः, कलान्यासः । वज्रगोलकान्यासः । गोलकान्यासः । तत्त्वन्यासः, कलान्यासः । अन्तर्मातृकान्यासः । बहिर्मातृकान्यासः । भुवनानि । षट्त्रिंशत्तत्त्वन्यासः । प्राणप्रतिष्ठा । नवदूतिकान्यासः । प्रवेशन्यासः । ध्यानस्वरूपम् । यात्राहोमविधिः । यागमण्टपविधिः । अष्टबन्धनादि । मृत्संग्रहणविधिः । यागमण्टपविधानम् । चतुर्वेदादीनां

ध्यानादि । वेदपारायणब्राह्मणवरणम् । आवरणदेवताध्यानादि-
कथनम् । नवग्रहपूजा, द्वारादिदेवतापूजा । अष्टादशसंस्कारैर्यागम-
ण्टपसंस्कारः । परिवारपूजाविधिः । पञ्चावरणपूजा । शिवमण्ड-
पपूजाविधिः । अग्निकार्यविधिः । अग्निदेवतयोरेकीकरणम् । परिस्त-
रणादि, षोडशकर्मनिरूपणम् । नाडीसंधानम् । जिह्वैकीकरणम् ।
शिवयागनवकुण्डहोमः । प्रधानकुण्डे नेत्राग्नहवनम् ।

Remarks:—The Ms. is in good condition.

॥ शिवसिद्धान्ततन्त्रम् ॥

15303. ŚIVASIDDHĀNTATANTRAM.

Burnell's Catalogue No. 3648. Paper. $14\frac{7}{8} \times 5\frac{1}{4}$ inches. Sheets—26. Lines—8-10 to a Page. Devanāgarī. No. of Granthas —570. Complete. Not printed.

Beginning: श्रीगणेशाय नमः ॥

पञ्चाक्षरी शिवपदेन विभाति रुद्रा-
ध्यायस्तथा स्फुरति तेन चतुर्थकाण्डः ।
काण्डेन सर्वयजुरेव विभाति तेन
ऋक्सामनध्यमणिना च विभान्ति वेदाः ॥
आणवं गर्भसंबन्धमणुरूपमवस्थितम् ।
मायाङ्गजातिभेदं च मोहमित्यभिधीयते ॥

* *

अतः परं प्रवक्ष्यामि विशेषार्थप्रकाशकम् ।
शिवसिद्धान्ततन्त्रोक्तं संवादं गुरुशिष्ययोः ॥
एवं पञ्चाधिकरणं विशेषार्थप्रकाशकम् ।
शिवानुभवसूत्रार्थं क्रमादेवं निरूप्यते ॥

End:

संसारबन्धमिच्छेऽहं शिवज्ञानाश्रय प्रभो । ऐपुराधीश
सोमेश नमस्ते षट्स्थलात्मने ॥ इति पूर्वोक्तमतिशोभनं परम् ।
ये ये तदाचरन्त्येवं स आचार्यवरो विभुः ।
परानुभवसूत्रेऽस्मिन्परमार्थं परं पदम् ॥

Colophon:

इति श्रीशिवसिद्धान्ततन्त्रे विशेषार्थप्रकाशके गुरुशिष्यसंवादे अवसानविधानं नाम पञ्चमाधिकरणम् ॥ ५ ॥

Remarks:—The Ms. is in good condition. This is an abridgment of the bigger work of Māyīdeva by an unknown author in 5 chapters.

सकलागमसारसंग्रहः ॥

15304. SAKALĀGAMASĀRASAṂGRAHAḤ.

Burnell's Catalogue No. 11426. Palm leaf. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—45. Lines—8 to a Page. Grantha. No. of Granthas—1250. Complete. Not printed.

Beginning: वागीशाद्याः + गजाननम् ॥

अथातः संप्रवक्ष्यामि शौचाचमनलक्षणम् ।
अङ्क्त्वा स्थित्वा यावदुत्तपः पूर्वं स्तुत्वा स्तोत्रैः प्रणम्य च ।
कर्तव्यं शुभकार्याणि चिन्तयित्वा समाहितः ।

End:

त्रिसंध्यं पूजयेल्लिङ्गं प्रक्षाल्य च पुनः पुनः ।
अर्कवारे तु बिल्वं स्यात्तुलसी सोमवारके ।
आरवारे कपित्थं स्यान्मातुलुङ्गं बुधे तथा ॥
गुरुवारे तु दमनं भार्गवे जम्बुपुष्पकम् ।
शनिवारे विष्णुक्रान्तं वारपत्रमिहोच्यते ॥

Colophon: Leaf 20.

इदि सकलागमसारसंग्रहे स्नानानुष्ठानं रवेरर्चनं च समाप्तम् ।

दन्तधावनम् , मृत्तिकास्नानम् , आर्द्रवस्त्रविचारः, भस्मधारणम्, करन्यासः, गायत्रीध्यानम् , etc.

Remarks:—The Ms. is in a fairly good condition. It deals with the daily routine of the followers of Āgama.

सकलागमप्रतिष्ठाक्रमः ॥

15305. SAKALĀGAMAPRATIṢṬHĀKRAMAḤ.

Not noticed by Burnell. No. 11427 b. Palm leaf. 12×1½ inches. Leaves—24 (1-5, 9-12, 14-17 20-27, 30-32). Lines —8 to a Page. Grantha. No. of Granthas—130. Incomplete. Not printed.

Beginning:

श्रीगुरुभ्यो नमः ॥

कारणं वातुलं चैव सूक्ष्मं च सुप्रभेदकम् ।
आगमं च चतुर्भेदं स्वायम्भोः पूजितक्रमः ॥
कामिकं विजयं चैव स्वायम्भुवमथानलम् ।
पूजां च देविके लिङ्गे कल्पयेत्कल्पवित्तमः ॥

End:

यानपूर्वाह्निकाले तु देव....विमलीकृतम् ।
डोलायां विन्यसेद्धीमान्डोलागानं समाचरेत् ॥
तदन्तं स्तोत्रभक्तं च ध्यानमम्बा...कुरु ।
आर्द्रायां पञ्चडोलमवरोहतीर्थमाचरेत् ॥

शिवार्चनफलम् ।

रूपं संपत् दीर्घमायुर्गुणं विद्या...धनं दानम् ।
मङ्गलाकरं प्रौडाङ्गनासंगमपत्रं वस्त्रसुगन्ध.... ॥

Remarks:—The Ms. is in a fairly good condition.

॥ सिद्धान्तशिखामणिः ॥

15306. SIDDHĀNTAŚIKHĀMAṆIḤ.

Burnell's Catalogue No. 3646. Paper. 14¾ × 5½ inches. Sheets—60. Lines—8-12 to a Page. Devanāgarī. No. of Granthas—1200. Śivayogin. Complete. Printed.

Beginning:

यः सोमेश्वरलिङ्गभूस्त्रिजगतां यद्देशिकेन्द्रं विदुं
येनाबोधि न कुम्भसंभवमुनेस्तस्मै नमः कुर्वते ।
यस्माद्दीप्यति वीरशैवसमयो यस्याः स्मृतं पूजया
.... ॥
.........सत्पारहम्बः समेतं
शिवाद्वैतसाकारसिद्धान्तसिद्धं
स्फुरद्वीरशैवाभिधानं ददत्षट्स्थलस्थं
यमीन्द्रं भजे रेणुकेन्द्रं गणेन्द्रम् ॥

Remarks:—The Ms. is in good condition. The Ms. itself is a copy of another broken Ms. and full of scriptorial blunders. Therefore everything that is said is subject to correction. The Śaivāgama pracārakas are mentioned in succession. The following geneology can be made out from the intro-ductory verses.

Śivayogin
|
Muddideva
|
Siddhanātha
|
Śivayogin

This work is printed at Sholapur in the Vīraśaiva Liṅga Brāhmaṇadharmagranthamālā Series with a commentary edited by Mallikārjuna Śāstrin.

But there is another geneology at the beginning from which it appears that one Revaṇa to be the author of this work. This was published in a series called Śivādvaitapañcaka as that of Revaṇa. (Vide British Museum Catalogue 1906–1928 colum 988). Though the text and commentary cannot be separated an introductory verse states that this is a ṭīkā on Siddhāntaśikhāmaṇi called Siddhārthabodhinī. But just at that place there is a break in the Ms.

॥ सिद्धान्तसारावली ॥

15307. SIDDHĀNTASĀRĀVALĪ.

Burnell's Catalogue No. 3645. Paper. 12⅛×6¼ inches. Sheets—222. Lines—8 to 10 to a Page. Devanāgarī. No. of Granthas—3550, Trilocanaśivācārya. Complete, Not printed.

Beginning: श्रीगणेशाय नमः ॥

कैलासशिखरासीनं सोमं सोमार्धशेखरम् ।
हरं दृष्ट्वाब्रवीत्तार्क्ष्यः स्तुतिसर्वमिदं(?)वचः ॥

किरणाख्यं महातन्त्रं परामृतसुखप्रदम् ।
सर्वानुग्राहकं शुभ्रं पदार्थोद्द्योतकं स्फुटम् ॥
पशुपाशपतिज्ञानं विचारप्रतिपादकम् ॥
क्रियाचर्यासमोपेतं योगभूतिपरायहम् ।

End:

विद्याशाशुद्धविद्या श्रुति च गणवरालोकपद्वारपाला
धर्माद्या मात्ररुद्रा शिवमतसहिता कौ....रे मूर्तयश्च ।
लोकेशासुरयक्षकिंनरमुने क्षेत्रेशवेतालका
भूतरसपरसतसद्रुद्रगणपा विद्याधराश्चापनौ ॥

श्रीमच्छैवमतार्थसारनिचिता सिद्धान्तसारावलिः

शैवज्ञानधिया त्रिलोचनशिवाचार्येण क्लृप्तं शुभम् ॥

Colophon:

इति त्रिलोचनशिवाचार्येण विरचिता सिद्धान्तसारावली समाप्ता ॥

The selections are as follows :—

किरणाख्यमहातन्त्रम्— विद्यापादः, चर्यापादः, योगपादः ॥

कामिकोपभेदे मृगेन्द्रोत्तरे— विद्यापादः, क्रियापादः, चर्यापादः, योगपादः ॥

Remarks:—The Ms. is in good condition. This is full of scriptorial blunders.

॥ सिद्धान्तसारावलिः—सव्याख्या ॥

15308. SIDDHĀNTASĀRĀVALIḤ—SAVYĀKHYĀ.

Burnell's Catalogue No. 11405. Palm leaf. 16½ × 11½ inches. Leaves—129 (110-238) Lines—8 to a Page. Grantha. No. of Granthas—4000. Incomplete. Not printed.

Beginning:

॥ मू ॥ मूले कालेन पक्के पतति च नखरे शक्तिराद्या भवेऽस्मि-

....न्निःश्रेयसेच्छागुरुवरभजनं तद्गतेशोऽस्य हौत्र्या ।

पाशान्संछिद्य शक्त्या नयति शिवपदं व्यञ्जयंस्तच्छिवत्वं।

दीक्षापूतोऽङ्कपाशक्षयकरसमयाचारमेवानुतिष्ठेत् ॥

End:

॥ व्या ॥ अथ सौरदशा पवित्रकालनिर्णयमाह—अर्क इति ।

* * ऋतवश्च द्विप्रकाराः सौराश्चान्द्रा इति ।

उक्तं च—' वसन्ताद्यृतवो द्वेधा चान्द्राः सौराश्च चन्द्रमाः ।

दर्शाद्या अथ मीनाद्या मेषाद्या वा विवस्वतः ॥

इति । अत्र मेषादि... ॥

Colophon: Nil.

Remarks:—The Ms. is in a fairly good condition. The name could

be given only from the title page. The Ms. itself does not contain any colophon.

॥ बाणालिङ्गलक्षणम् ॥

15309. BĀṆALIṄGALAKṢAṆAM.

Burnell's Catalogue No. 2020. Paper. 10×3½ inches. Sheets—4. Lines—9 to a Page. Devanāgarī. No. of Granthas—50. Complete. Not printed.

Beginning: श्रीसदाशिवाय नमः ।

बाणलिङ्गलक्षणम् । सिद्धान्तसारावल्याम् ॥

बाणं लिङ्गमधिष्ठितेशमनिशं माषादिहस्तान्तकं

जम्बूपक्कफलोपमं....भृङ्गप्रभं काञ्चनम् ।

नीलं वा प्रतिबिम्बवद्धरितभं तद्वर्णपीठं क्रमा-

त्तुल्यं गोस्तनकुक्कुटाण्डसदृशं स्निग्धं सदा संश्रयेत् ॥

End: कपिलापञ्चगव्येन विधिना सकृदर्चयेत् ।

स्नानं शतगुणं ज्ञेयमितरेभ्यो न संशयः ॥

Colophon: Nil.

Remarks:—The Ms. is in good condition.

॥ शङ्खपरीक्षा ॥

15310. ŚAṄKHAPARĪKṢĀ.

Burnell's Catalogue No. 2015. Paper. 10×1½ inches. Sheet—1. Lines—15 to a Page. Devanāgarī. No. of Granthas—14. Complete. Not printed.

Beginning :

श्रीशालिवाहन ऋषिरुवाच—

मौद्गल्य शृणु शङ्खानामुत्पत्तिं शास्त्रसंमताम् ।

रत्नाकरे समुद्रे तु विशाखा यदि वर्षति ।
तदानीं शङ्खसंघानामुत्पत्तिः कथिता बुधैः ॥

End:

अपारकोशवृद्धिः स्यादस्य शङ्खस्य संग्रहात् ।
परराष्ट्रागमे नित्यं भूमेः सम्राड्भवेत्तदा ।

Colophon: Nil.

Remarks:—The Ms. is in good condition.

SAṄKHAPARĪKṢĀ.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15311	B. L. 2014	P.	De.	Complete.

॥ शिवध्यानपद्धतिः ॥

15312. ŚIVADHYĀNAPADDHATIḤ.

Ms. No. 16068. Palm leaf. 10 × 1½ inches. Leaves—6. Lines—7-8 to a Page. Grantha. No. of Granthas —15. Complete. Not printed.

Beginning:

मधो हृदब्जपाथोज ॥

End:

श्रीशिवध्यानपद्धतिः

Colophon: इति शिवध्यानपद्धतिः संपूर्णा ॥

Remarks:—The Ms. is in a good condition,

॥ शिवयोगीन्द्रदीपिका ॥

15313. ŚIVAYOGĪNDRADĪPIKĀ.

Ms. No. 16064. Palm leaf. 7 × 1 inches. Leaves—11.

Lines—5 to a Page. Telugu. No. of Granthas—30. Incomplete. Not printed.

Beginning: अतः परं प्रवक्ष्यामि ।

End: ....भव ।

Colophon:

इति शिवयोगीन्द्रदीपिकायां सप्तमः पटलः ॥

Remarks :—The Ms. is in good condition.

॥ शिवागमप्रामाण्यम् ॥

15314. ŚIVĀGAMAPRĀMĀṆYAM.

Ms. No. 11386 c. Palm leaf. 15½ × 1⅜ inches. Leaves—4. Lines—7 to a Page. Grantha. No. of Granthas—100. Incomplete. Printed.

Beginning:

वेदाः प्रमाणमिति संगिरमाण एव

दिव्यं तदागममवैति जनः प्रमाणम् ।

तद्व्यानवाक्यविषयौपयिकैः पदार्थै-

राप्तूर्धमाकलितविग्रहमा च कूलात् ॥

End:

तदुक्तमन्यत्र ॥

यथा मृगपतिं दृष्ट्वा वने भीतो गजस्तथा ।

अदीक्षितार्चितं लिङ्गं दृष्ट्वा भीतो महेश्वरः ॥

Remarks:—The Ms. is in good condition. This is a fragment. A work of this name is printed at Benares.

॥ शिवागमविषयश्लोकाः ॥

15315. ŚIVĀGAMAVIṢAYAŚLOKĀḤ.

Burnell's Catalogue No. 3634. Paper. 14½ × 5⅜ inches. Sheet

—1. Lines—8 to a Page. Devanāgarī. No. of Granthas—8. Complete. Not printed.

Beginning: श्रीगणेशाय नमः ।

मक्षिका मशकाः केशास्तृणबीजानि वल्कलाः ।
पाषाणमृत्तिकाश्चैव क्रिमिकीटादिजन्तवः ॥
एतान्सर्वान्परित्यज्य शुचिपाकानि यानि वै ।
तानि गृह्णामि देवेश क्षमस्व परमेश्वर ॥

End:

क्षेत्रे सप्तपदे कृते नवपदे मध्ये लिखेत्कर्णिकां
किञ्जल्कान्वितमष्टपत्रसहितं पद्मं तदभ्यग्रके ।
वेदाशासितकोष्ठकानि मतिमान्संत्यज्य पिष्टेषु स
कोष्ठेष्वल्पसरोरुहाणि विलिखेत्स्याद्भद्रकं मण्डलम् ॥

Remarks:—The Ms. is in good condition. There are stray verses.

॥ शिवालयपूजाक्रमः ॥

15316. ŚIVĀLAYAPŪJĀKRAMAḤ.

Burnell's Catalogue No. 11392. Palm leaf. 16 × 1½ inches. Leaves—6. Lines—8 to a Page. Grantha. No. of Granthas—120. Incomplete. Not printed.

Beginning:

……फलकं तस्य साक्षाल्लक्ष्मीपतिः स्वयम् ।
तस्मात्प्रागादिमध्यस्थं प्रणवादिस्वराष्टकम् ।
योगासनं विभोर्ध्यायेत्कूर्माकृत्यनलप्रभम् ॥
तस्योर्ध्वच्छदनं पद्ममासनं विपुलं स्मरेत् ॥

End:

सर्वज्ञानादिसंसिद्धहृदयादिषडङ्गकम् ।

पञ्चब्रह्मात्मवदनं पञ्चमादाद्यवक्त्रकम् ।

श्रीमत्पञ्चाक्षर.................... ॥

Remarks :—The Ms. is in a decaying condition. It is not possible to identify the work from which this is an extract.

॥ शिवालयार्चनविधिः ॥

15317. ŚIVĀLAYĀRCANAVIDHIḤ.

Ms. No. 16065. Palm leaf. 16×1 inches. Leaves—7. Lines—6 to a Page. Grantha. No. of Granthas—80. Complete.

Beginning :

पापक्षालनम् । शुद्धाचमनम् ।

End: विनायकमर्चयेत् ॥

Colophon : Nil.

Remarks:—The Ms. is in good condition.

॥ शैवागमविषयः ॥

15318. ŚAIVĀGAMAVIṢAYAḤ.

Ms. No, 16066. Paper. $12\frac{1}{2} \times 5\frac{1}{8}$ inches. Sheets—6. Lines—10 to a Page. Devanāgarī. No. of Granthas—135. Incomplete.

Beginning :

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।

न च संन्यसनादेव सिद्धिं समधिगच्छति ॥

सोऽपि पातञ्जलो द्विविध इति प्रागेव प्रोक्तः ।

End:

त्रिकालविषयज्ञानव्यक्तोदयमहाबलाः ।

इत्येतैः सिद्धिरुक्ताः सत्यन्ताः सिद्धयः प्राकृताः ॥

Remarks:—The Ms. is in good condition. There is evidence to indicate the name of this work. Mṛgendrāgama and Śrī Rāmakaṇṭha are quoted. Mention is made of Amanaskayoga and latterly Jñāna and Śaivadīkṣā are dealt with.

॥ अहिर्बुध्न्यसंहिता ॥

15319. AHIRBUDHNYASAMHITĀ.

Burnell's Catalogue No. 11422, Palm leaf. 16×1½ inches. Leaves—193 (190 +3). Lines—6 to a Page. Grantha. No, of Granthas—4000. Complete. Printed.

Remarks:—The Ms. is in a fairly good condition. This is edited from the Adyar Library at Madras in 1916 with a preface by John Van Manen under the supervision of F. Otto Schrader.

AHIRBUDHNYASAMHITĀ.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15320	B. L. 13938	P.	Ds.	Incomplete.

॥ कपिञ्जलसंहिता ॥

15321. KAPIÑJALASAMHITĀ.

Burnell's Catalogue No. 1782. Paper. 14¾×5¼ inches. Sheets—30. Lines—9-11 to Page. Devnāgarī. No. of Granthas—1150. Kapiñjala. Complete.

Beginning:

श्रीमहाविष्णवे नमः । श्रीगणेशाय नमः ॥

मेरुशृङ्गे तथा पुण्ये नानारत्नोपशोभिते ।

सिद्धविद्याधराकीर्णे नानागन्धर्वसेविते ॥

नानादेवगणाकीर्णे गजसिंहसमाकुले ।

नानाकिंनरनागाद्यैर्बहुभिश्च समावृते ॥

End:

देशिकं वा समारोप्य विग्रहे विनिवेशयेत् ।
सद्यो वा सकलं कुर्यान्निशि वा दिवसेऽपि वा ॥
न तिथिर्न च नक्षत्रं...वा न विद्यते ।
तस्मात्सर्वप्रयत्नेन क्षिप्रं शान्तिं समाचरेत् ॥
इति संक्षेपतः प्रोक्तं प्रायश्चित्तं सुपुष्कलम् ।

Colophon:

इति श्रीपाञ्चरात्रे कपिञ्जलसंहितायां प्रायश्चित्तविधिर्नाम द्वाविंशोऽध्यायः ॥ शुभमस्तु ॥

तन्त्रानुक्रमणम् । आचार्यलक्षणम् । वैष्णवसमयाचारः । नक्षत्रविधिः । भूमिसंग्रहः । ग्रामविन्यासः । प्रतिमालक्षणत् । पुष्पविधानम् । अङ्कुरार्पणविधिः । ध्वजारोहणविधिः । उत्सवविधानम् । पुष्पयागविधानम् । मन्त्रकोशविधानम् । जीर्णोद्धारणविधानम् । मुद्रालक्षणविधानम् । स्वापविधानम् । पूरणविधानम् । पत्रच्छेदविधानम् । प्रायश्चित्तविधानम् । पवित्रारोहणम् । प्रायश्चित्तविधिः ।

Remarks:—The Ms. is in good condition. It contains 21 Adhyayās as stated above.

KAPIÑJALASAMHITĀ.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15322	B. L. 1734	P.	De.	Complete.

॥ गारुडसंहिता—चतुर्विंशतिमूर्तिलक्षणम् ॥

15323. GĀRUḌASAMHITĀ—CATURVIMŚATI-MŪRTILAKṢAṆAM.

Burnell's Catalogue No. 256. Paper. 10 × 4 inches. Sheets

6—9. Lines—7 to a Page. Devanāgarī. No. of Granthas —80. Complete. Not printed.

Beginning:

गारुडसंहितायां चतुर्विंशतिमूर्तिलक्षणम् ।

शङ्खचक्रगदापद्मधरः केशव उच्यते ॥

नारायणः पद्मगदाचक्रशङ्खधरो मतः ।

End:

आयुष्यं वृद्धिमतुलामारोग्यं लभते फलम् ।

इहामुतस्तु तत्रस्थो मोक्षादिफलमश्नुते ॥

Remarks:—The Ms. is in good condition.

॥ चतुर्विंशतिमूर्तिलक्षणम् ॥

15324. CATURVIMŚATIMŪRTILAKṢAṆAM.

Burnell's Catalogue No. 12318. Paper. 9¾×4 inches. Sheets—8. Lines—7 or 8 to a Page. Devanāgarī. No. of Granthas—15. Complete. Not printed.

Beginning:

श्रीरस्तु ॥ पाञ्चरात्रे क्रियापादे ।

चतुर्विंशतिमूर्तीनां लक्षणं कथ्यतेऽधुना ।

केशवश्चाम्बुजं शङ्खं चक्रं दण्डं च धारयेत् ॥

प्रादक्षिण्येन बाहूनामन्येषामुच्यते क्रमात् ।

End:

अरिकंजगदाशङ्खकरो नः शरणं हरिः ।

कृष्णो गदापद्मचक्रशङ्खाङ्कः प्रीयतां मम ॥

Remarks:—The Ms. is in good condition. On the title page is given:—

'श्रीतुलजाराजस्येदं पुस्तकम्' केशवादिचतुर्विंशतिमूर्तिलक्षणम् ।

It is not known of what Āgama is this a portion.

॥ चतुर्विंशतिमूर्तिलक्षणम् ॥

15325. CATURVIṂŚATIMŪRTILAKṢAṆAM.

Ms. No. 16067. Paper. $4\frac{1}{8} \times 10\frac{1}{8}$ inches. Sheet—1. Lines—6 to a Page. Devanāgarī. No. of Granthas—12. Complete. Not printed.

Beginning:

शं च	प ग	च शं	ग प	प शं	शं प
केशव	नारायण	माधव	गोविन्द	विष्णु	मधुसूदन
प ग	शं च	ग प	च शं	ग च	च ग
ग च	च ग	च ग	च प	प च	शं ग
त्रिविक्रम	वामन	श्रीधर	हृषीकेश	पद्मनाभ	दामोदर
प शं	शं प	प शं	ग शं	शं ग	प च
शं प	शं च	शं ग	ग शं	प शं	ग शं
संकर्षण	वासुदेव	प्रद्युम्न	अनिरुद्ध	पुरुषोत्तम	अधोक्षज
ग च	ग च	च प	च प	च ग	प च
प ग	प च	च शं	ग च	च प	ग प
नारसिंह	अच्युत	जनार्दन	उपेन्द्र	हरि	कृष्ण
च शं	ग शं	प ग	शं प	शं ग	शं च

शङ्खचक्रगदापद्मधराश्चैते हि सर्वशः ।
क्रमव्युत्क्रमपद्मादिगदादि व्युत्क्रमस्तथा ।
अर्धक्रमः सान्तरश्च षट्सु षट्स्वरिपूर्विणाम् ॥

दक्षोच्चकरशङ्खिनः

शं च	शं प	शं प	शं ग	शं च	शं ग
केशव	मधुसूदन	संकर्षण	दामोदर	वासुदेव	प्रद्युम्न
प ग	च ग	ग च	प च	ग च	च प

1060

वामोच्चकरशङ्खिनः

प शं	च शं	ग शं	प शं	ग शं	च शं
विष्णु	माधव	अनिरुद्ध	पुरुषोत्तम	अधोक्षज	जनार्दन
ग च	ग प	च प	च ग	प च	प ग

वामाधःकरशङ्खिनः

ग प	ग च	च ग	च प	प ग	प च
गोविन्द	त्रिविक्रम	श्रीधर	हृषीकेश	नृसिंह	अच्युत
श चं	प शं	प शं	ग शं	श चं	ग शं

दक्षाधःकरशङ्खिनः

च ग	प ग	प च	ग च	च प	ग प
वामन	नारायण	पद्मनाभ	उपेन्द्र	हरि	कृष्ण
शं प	शं च	शं ग	शं प	शं ग	शं च

Remarks:—The Ms. is in good condition.

॥ पाद्मसंहिता ॥

15326. PĀDMASAMHITĀ.

Burnell's Catalogue No. 296. Paper. $15 \times 5\frac{1}{2}$ inches. Sheets—285. Lines—11 to a Page. Devanāgarī. No. of Granthas—9000. Complete, Printed.

Remarks:—The Ms. is in good condition. This is published at Melukoti and printed at Madras edited with a preface by Yadugiri Rāmānujamuni in 1923.

PĀDMASAMHITĀ.

Des. No.	Coll. No.		Subs.	Script.	Remarks.
15327	B. L.	297	P.	De.	Complete.
15328	„	11418	Pl.	Gr.	„
15329	„	11419	„	„	Incomplete.
15330	„	11423	„	„	„

PĀDMASAMHITĀ (Contd.)

Des. No.	Coll. No.		Subs.	Script.	Remarks.
15331	B. L.	6465	P.	De,	Fragment.
15332	„	11424	Pl.	Gr.	„

॥ पारमेश्वरसंहिता—पाञ्चरात्रम् ॥

15333. PĀRAMEŚVARASAMHITĀ (PĀÑCARĀTRAM).

Burnell's Catalogue No. 257. Paper. 15×5½ inches. Sheets—192. Lines—11. to a Page. Devanāgarī. No. of Granthas—8000. Complete. Not printed.

Beginning: श्रीगणेशाय नमः ॥

नमः सकलकल्याणदायिने चक्रपाणये ।
विषयार्णवमग्नानां समुद्धरणहेतवे ॥
तोताद्रिशिखरक्षेत्रे देवगन्धर्वसेविते ।
पुण्यतीर्थसमायुक्ते सर्वर्तुकुसुमान्विते ॥

तमाश्रयस्व भद्रं ते भगवद्धर्मसिद्धये ॥

End:

गोपनीयं प्रयत्नेन मद्भक्तानां जनार्दने ।
भावभक्तिसमेतानां वाच्यवाचकयोर्गुरौ ॥
शास्त्रे ज्ञानक्रियोपेते सात्त्विके वेदसंमिते ।
आस्तिक्यं जायते येषां तेषामेतत्प्रकाशय ॥

Colophon:

इति श्रीपाञ्चरात्रे पाञ्चरात्रक्रियाकाण्डे सुदर्शनमहायन्त्रार्चनेऽग्निकार्यविधिर्नाम षड्विंशोऽध्यायः । शुभमस्तु ॥ ॐ तत्सत् ॥

Remarks:—The Ms. is in good condition. It deals with the

following topics:—

ज्ञानकाण्डे— शास्त्रावतारः ।

क्रियाकाण्डे—साधकस्नानविधिः, समाधिः, मन्त्रन्यासविधिः, मानसयोगः, अग्निकार्यनित्योत्सवविधिः, गरुडविष्वक्सेनपरिवारार्चनम्, द्वादशकालार्चनादिकालनिर्णयः, स्वयंव्यक्तादिप्रासादतद्देवतानिर्णयः, बिम्बपतनवैकल्यप्रायश्चित्तम्, स्नपनविधानम्, प्रतिष्ठाविधानम्, ध्वजारोहणम्, महोत्सवविधिः, प्राणादिमानसाधननिवेदनादिप्रकारः, प्रायश्चित्तविधानम्, प्रायश्चित्ततुलाभारविधानम्, सुदर्शननृसिंहमहायज्ञविधानम्, राजमन्त्रोद्धारविधिः, सुदर्शनमहायन्त्रार्चनवह्निकार्यविधिः ।

PĀRAMEŚVARASAṂHITĀ.

Des. No,	Coll. No.		Subs.	Script.	Remarks.
15334	B. L.	258	P.	De.	Complete.
15335	„	11420	Pl.	Gr.	Incomplete.

॥ पौष्करसंहिता ॥

15336. PAUṢKARASAṂHITĀ.

Burnell's Catalogue No. 11401b Palm leaf. 18×1½ inches. Leaves—12 (49-60). Lines—5 to a Page. Grantha. No. of Granthas—300. Incomplete. Not printed.

Beginning:

ऋषय ऊचुः—भगवन्देवदेवेश ब्रह्मविष्ण्विन्द्रनायक ।
आपिङ्गलजटाजूटारोपितार्धेन्दुशेखर ॥

* *

अधुना ज्ञानपादं तु श्रोतुमिच्छा गरीयसी ।
वर्तते तमपाकर्तुमर्हस्यस्माकमीश्वर ॥

End:

यक्षोग्यं भोजकं चैतत्तस्मात्कर्म.... ।

प्रकृतेः परिणामो यो बौद्धो भावाष्टकात्मजः ॥

स स्यात्कर्मण्यजोऽन्यस्तु भोग्यः स्यादिति चेन्मतिः ।

Remarks: —The Ms. is in a fairly good condition.

॥ विहगेन्द्रसंहिता ॥

15337. VIHAGENDRASAṂHITĀ.

Burnell's Catalogue No. 11421. Palm leaf. 17×1¼ inches. Leaves—58. Lines—4 to 6 to a Page. Grantha. No. of Granthas—900. Agastya. Incomplete. Not printed.

Beginning:

अम्बरीष उवाच—

नमो मुनिवरश्रेष्ठ सर्वशास्त्रविशारद ।

कुम्भोदरसमुद्भूत श्रोतुमिच्छामि तत्त्वतः ॥

के देवाः के च ऋषयो मन्त्राः के च महामुने ।

किं पुरश्चर्यकं साध्यं का पूजा किं फलं भवेत् ॥

End:

जपः पदातिर्जलतृप्तिरश्वो गजस्तथा होमरथं च पुष्पम् ।

नृपस्य मन्त्रिरिह चातुरङ्गो जयं पराक्रम्य सुरक्षितं च ॥

Colophon:

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां तन्त्ररहस्ये अगस्त्यप्रोक्ते श्रीसुद-

र्शनकल्पे महामार्जनविधानो नामाष्टादशः पटलः ।

Remarks:—The Ms. is in good condition.

VIHAGENDRASAṂHITĀ.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15338	B. L. 11420 a	P.	Gr.	Incomplete.
15339	„ 11420 b	„	„	„
15340	„ 12331	P.	De.	„

॥ पाञ्चरात्रागमः—सात्वतसंहिता ॥

15341. PĀÑCARĀTRĀGAMAḤ—SĀTTVATASAṂHITĀ.

Burnell's Catalogue No. 1735. Palm leaf. 9½×5 inches. Sheets—128. Lines—10 to a Page. Devanāgarī. No. of Granthas—3250. Complete. Printed.

Remarks:—The Ms. is in good condition. This Saṃhitā is published at Conjeevaram in the Śāstramuktāvalī Series No. 15 edited by P. B. Anantācāriar.

PĀÑCARĀTRĀGAMAḤ—SĀTTVATASAṂHITĀ.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15342	B. L. 1736	P.	De.	Complete.
15343	„ 1737	„	„	„

॥ वैखानसतन्त्रम् ॥

15344. VAIKHĀNASATANTRAM.

Burnell's Catalogue No. 3652. Paper. 14½×5½ inches. Sheets—132 (1-13, 1, 21-40, 1-6, 13, 1-12, 9-34, 1-25, 1-24, 7-8). Lines—10 to a Page. Devanāgarī. No. of Granthas—4000. Marīci. Incomplete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

शुक्लाम्बरधरं + सर्वविघ्नोपशान्तये ॥

ऋषयः ॥ मरीचिं महामुनिश्रेष्ठं स्वशिष्यार्पितकुशासने समासीनं नानालोकनिवासिनः धर्मरता ऋषयः समागम्या-भिवाद्य भगवन्केन मार्गेण कैर्मन्त्रैः कं देवमर्चयन्तः का-ल्लँलोकान्गमिष्यन्त इति ।

End:

तन्मन्त्रेण तन्मूर्तिभिरावाह्यासनाद्यैरभ्यर्च्य हविर्निवेद-येदेवं यः कुरुते भक्त्या रिपून्सर्वाञ्जित्वा इष्टान्कामानवाप्य विष्णुलोके महीयत इति विज्ञायते ।

Colophon:

इति श्रीवैखानसे मरीचिप्रोक्ते विमानार्चनकल्पे चक्रलक्षणादिविधि-र्नाम पञ्चाशत्तमः पटलः ।

The topics are as follows.—

भूपरीक्षालयविधिः, कर्षणबीजावापनपददेवताबलिविधिः, तरुणालय-विधिः, प्रथमेष्टकाविधिः, प्राकारगोपुरपरिषदां विधिः, इष्टका-विन्यासविधिः, नवविधपरिषदर्चकपरिचारकविधिः, शिलासंग्रह-विधिः, शिलास्थापनविधिः, दारुसंग्रहणविधिः, मूलस्थापनविधिः, त्रिविधध्रुवबेरविधिः, देवदेव्यादीनां वर्णवाहनादिविधिः, कौतुका-दिलक्षणम्, दशतालविधिः, पात्रपरिच्छदादिलक्षणम्, पात्रप-रिच्छदादीनां संस्कारः, अङ्कुरार्पणविधिः, ध्रुवबेरादीनामक्षिमो-चनम्, अधिवासत्रयविधिः, यागोपकरणविधिः, अग्निकुण्डविधिः, कुम्भध्यानशयनविधिः, सर्वदेवार्चनविधिः, रत्नन्यासादिविधिः, परिवारप्रतिष्ठाविधिः, नवषट्पञ्चमूर्तिः, षट्पञ्चमूर्तिकल्पनम्, षट्पञ्चमूर्तिप्रतिष्ठाविधिः, स्थानकादिस्थापनत्रिमूर्तिस्थापनविधिः, विमानप्रतिष्ठाविधिः, देवीपृथक्प्रतिष्ठाविधिः, नित्यार्चनविधिः, ब-लिविष्ण्युपचारभेदसंख्याघटिकाविधिः, हविर्विधिः, नवषट्पञ्चमूर्त्य-र्चनाविधिः, एकबेरार्चनाविधिः, मासविशेषपूजाविधिः, शुद्धस्न-

पनाग्नेयविधिः, स्नपनद्रव्यादिविधिः, स्नपनविधिः, चक्रलक्षणादिविधिः ।

Remarks:—The Ms. is in good condition.

॥ गुणरत्नकोशः ॥

15345. GUṆARATNAKOŚAḤ.

Ms. No. 16068. Palm leaf. 10×1 2/10 inches. Leaves—6. Lines—7 to a Page. Grantha. No. of Granthas—100. Vedantadeśika. Complete. Not printed.

Beginning:

श्रीपराशर ।

End:

पराशरकेसरी ।

Colophon: Nil.

Remarks:—The Ms. is in good condition.

॥ तन्त्राधिकारिविचारः—पाञ्चरात्रम् ॥

15346. TANTRĀDHIKĀRIVICĀRAḤ—PĀÑCARĀTRAM.

Burnell's Catalogue No. 259. Paper. 9½×4¼ inches. Sheets—31. Lines—9 to a Page. Devanāgarī. No. of Granthas—530. Incomplete. Wants end. Not printed.

Beginning:

ॐ सदाशिवाय नमः ॥ श्रीगणेशाय नमः ॥

विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।
चरीकर्ति बरीभर्ति संजरीहर्ति लीलया ॥
शुद्धवैदिकमार्गेण शिवमाराधयन्सदा ।
द्विजेन्द्रोऽसौ विजयते श्रीमान्रुक्माङ्गदः सुधीः ॥

तस्य धर्मैकनिष्ठस्य कुतन्त्रध्वान्तभास्करः ।

प्रीतये पाञ्चरात्रादेरधिकारी निरूप्यते ॥

End:

तस्मात्पतितादय एव शङ्खचक्राद्यङ्कनादावधिकारिण

इति सिद्धम् ॥

Remarks:—The Ms. is in good condition. This is a work belonging to Pāñcarātrāgama.

TANTRĀDHIKĀRIVICĀRAḤ—PĀÑCARĀTRAM.

Des. No.	Coll. No.	Sub.	Script.	Remarks.
15347	B. L. 260	P.	De.	Incomplete.

॥ पञ्चसंस्कारः ॥

15348. PAÑCASAMSKĀRAḤ.

Burnell's Catalogue No. 8909. Paper. $6\frac{3}{4} \times 4\frac{1}{4}$ inches. Sheets—3. Lines—8 to a Page. Devanāgarī. No. of Granthas—17. Complete. Not printed.

Beginning: श्रीगणेशाय नमः ॥

ॐ भद्ररूपं तप्तचक्रे तुलसीगोपिमृत्तिकाः ।

श्रा...सूत्रकमण्डलुं धौतवस्त्रं स्मराति गुरुमुखे॰

End:

श्रीरामस्य दासो भवति । दासोऽहमस्मि पञ्चसंस्कार-

वान् स वैष्णवानामर्थे भावयोऽयं(?) स्मरेत् । सरूपो भवति ॥

Colophon: इति पञ्चसंस्कारः ॥

Remarks:—The Ms. is in good condition.

॥ प्रपत्तिमार्गः ॥

15349. PRAPATTIMĀRGAḤ.

Ms. No. 16069. Palm leaf. 12×1 inches. Leaves—4. Lines—5 to a Page. Grantha. No. of Granthas—25. Incomplete. Not printed.

Beginning:

यामुनमुनये नमः + स तु देवः प्रपन्नाय ।

End:

त्वायेवंव्यवसायः ॥

Colophon: Nil.

Remarks:—The Ms. is in good condition.

॥ भगवद्ध्यानसोपानम् ॥

15350. BHAGAVADDHYĀNASOPĀNAM.

Ms. No. 16070. Palm leaf. 16×1¼ inches. Leaves—2. Lines—7 to a Page. Grantha. No. of Granthas—40. Vedāntadeśika. Complete. Not printed.

Beginning:

श्रीमान्वेङ्कट ।

End:

गुरवे नमः ।

Colophon: Nil.

Remarks:—The Ms. is in good condition.

BHAGAVADDHYĀNASOPĀNAM.

Des. No.	Coll. No.		Subs.	Script.	Remarks.
15351	Ms.	16071	Pl.	Gr.	Complete.
15352	,,	16072	,,	,,	,,

॥ रहस्यत्रयसारसंग्रहः ॥

15353. RAHASYATRAYASĀRASAṂGRAHAḤ.

Not noticed by Burnell. Ms. No. 9850 a. Palm leaf. 14×1/10 inches. Leaves—5. Lines—6 to a Page. Grantha. No. of Granthas—40. Complete. Not Printed.

Beginning : श्रीमद्वेदान्तगुरवे नमः ॥

श्रीमान्वेंकटनाथार्यः + सदा हृदि ॥

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।

विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥

End:

अज्ञानजन्मकृतमात्मगुणैर्विमुक्त-

माज्ञातिलङ्घनपरं वृषशैलनाथ ।

मिथ्याप्रपन्नमपि मामवलोक्य त्वं

लक्ष्मीः क्षमापि...गुरूनवलोक्य पूज्यान् ॥

உதாரதிவேறுாகக்கலைபறுவைக்கிப்பக.

Colophon:

इति रहस्यत्रयसारसंगृहीतोऽयं प्रपन्नस्यनुष्ठानप्रकारः ॥

Remarks:—The Ms. is in a fairly good condition. This appears to be a portion of a comprehensive book.

॥ वैष्णवाराधनम् ॥

15354. VAIṢṆAVĀRĀDHANAM.

Ms. No. 16073. Palm leaf. 10×1 inches. Leaves—40. Lines—4 to a Page. Grantha. No. of Granthas—250. Incomplete.

Beginning:

...वातमाचारे तातार्यमहं भजे ।

End:

अग्नये नम इति मूल

Colophon: Nil.

Remarks:—The Ms. is in good condition.

॥ सालग्रामपरीक्षा ॥

15355. SĀLAGRĀMAPARĪKṢĀ.

Burnell's Catalogue No. 2019. Paper. 10×4¾ inches. Sheets—43. Lines—9 to a Page. Devanāgarī. No. of Granthas—800. Complete. Not printed.

Beginning: श्रीगणेशाय नमः ॥ सालग्रामलक्षणम् ॥

श्रीकृष्णं गोपिकानाथं प्रणम्य जगतां प्रभुम् ।
ग्रन्थान्बहून्समालोक्य श्रुत्वा चाहं क्वचित्क्वचित् ॥
विष्णुना गरुडप्रोक्तं ब्रह्मणा नारदाय च ।
सालग्रामशिलाभेदं ग्राह्याग्राह्यफलं तथा ॥

End:

गण्डपत्रैर्लक्षगुणं दशलक्षगुणं तथा ।
सुगन्धमूलैर्वंशाद्यैर्बिल्वकोटिगुणं फलम् ।
पुनातु तुळसीपात्रैरनन्तगुणितं फलम् ॥

Colophon:

द्वारकाचक्रलक्षणं समाप्तम् ॥

Remarks:—The Ms. is in good condition.

SĀLAGRĀMAPARĪKṢĀ.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15356	B. L. 2024	P.	De.	Complete.

॥ सालग्राममाहात्म्यम् ॥

15357. SĀLAGRĀMAMĀHĀTMYAM.

Burnell's Catalogue No. 2027. Paper. 8×4 inches. Sheet—1. Lines—8 to a Page. Devanāgarī. No. of Granthas—6. Incomplete.

Beginning: श्रीरामचन्द्राय नमः ॥

अथ पाञ्चरात्रागमे वराहपृथ्वीसंवादे

द्वारवत्याः शिलादेवी चक्रवत्या प्रदर्शिता ।

यत्रापि नियते तत्स्याचीर्थं द्वादशयोजनम् ॥

End:

सालग्रामशिलातोयमपीत्वा यस्तु मस्तके ।

प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निपद्यते ॥

Colophon: Nil.

Remarks:—The Ms. is in good condition.

॥ सालग्राममूर्तिलक्षणम् ॥

15358. SĀLAGRĀMAMŪRTILAKṢAṆAM.

Burnell's Catalogue No. 2016. Paper. 9½×4½ inches. Sheets—46. Lines—7 to a Page. Devanāgarī. No. of Granthas—450. Complete. Not printed.

Beginning: श्रीरामचन्द्राय नमः ॥

गण्डक्याश्चोत्तरे तीरे गिरिराजस्य दक्षिणे ।

क्षेत्रं तु विष्णुसांनिध्यात्सर्वदेवोत्तमोत्तमम् ॥

End:

सालग्रामशिलास्तोत्रं यः पठेद्दिनमुत्तमम् ।

सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥

Colophon:

इति सालग्रामलक्षणं समाप्तम् ॥

Remarks:—The Ms. is in good condition.

SĀLAGRĀMAMŪRTILAKṢAṆAM.

Des. No.	Coll. No.		Subs.	Script.	Remarks.
15359	B. L.	2028	P.	De.	Complete.
15360	„	2029	„	„	„
15361	„	2030	„	„	„
15362	„	2025	„	„	Incomplete.
15363	„	2026	„	„	„
15364	„	2031	„	„	„
15365	„	9348	Pl.	Gr.	„
15366	„	9349	„	„	„
15367	„	9915 b	„	„	„
15368	„	10782 b	„	„	„
15369	Ms.	16074	„	„	„
15370	„	16075	„	„	„

॥ हरिलीला ॥

15371. HARILĪLĀ.

Ms. No. 16076. Palm leaf. $18 \times 1\frac{3}{10}$ inches. Leaves—6. Lines—7 to a Page. Grantha. No. of Granthas—180. Bopadevaḥ. Complete. Not printed.

Beginning:

श्रीमद्भागवतस्कन्ध ।

End:

अस्यावलोकनादेव हरिभक्तिर्विवर्धते ।

Colophon:

इयं हरिलीला संपूर्णा ॥

Remarks:—The Ms. is in good condition.

॥ कात्यायनीतन्त्रव्याख्या ॥

15372. KĀTYĀYANĪTANTRAVYĀKHYĀ.

Burnell's Catalogue No. 3434. Paper. $10\frac{3}{8} \times 4\frac{1}{8}$ inches. Sheets—21. Lines—7 or 8 to a Page. Devanāgarī. No. of Granthas—360. Incomplete. Not printed.

Beginning: श्रीगणेशाय नमः ॥

श्रीमातृचरणारविन्दाभ्यां नमः ॥

मणिमन्त्रौषधादिसकलसौभाग्यसंप्रकाशसमृद्धिपरतया मन्त्राणामेतेषां सविशेषपरत्वेऽपि स्वप्रदत्तदेवताप्रसादेन कल्याणदेशिककटाक्षपक्षपातपल्लवितेन जीवचिद्भेदपरतया व्याख्यानाभ्यनुज्ञानस्य प्राप्तियाकलय्य चिद्भेदपरत्वेन सप्तशत्याख्यं मन्त्ररत्नं व्याख्यातुं कथा प्रस्तूयते ॥

End:

मैषेति ॥ सविशेषा देवतेत्यर्थः । प्रसन्नेति प्रकर्षेण सन्ना प्रसन्ना । सन्नता च उत्सन्नता । सा च प्रशिथिलविशेषतारूपा विवक्षिता । वरदेति अखण्डाकारवृत्तिरूप०

Colophon: Nil.

Remarks:—The Ms. is in good condition.

KĀTYĀYANĪTANTRAVYĀKHYĀ.

Des. No.	Coll. No.	Subs.	Script.	Remarks.
15373	B. L. 3431	Pl.	Gr.	Incomplete
15374	„ 3432	„	„	„
15375	„ 3433	„	„	„

॥ कुलार्णवतन्त्रम् ॥

15376. KULĀRṆAVATANTRAM.

धर्मज्ञानार्थमातन्मः कालनिर्णयदीपिकाम् ॥ १ ॥

यद्यप्यर्थवशात्प्राप्तं स्पष्टतायै क्वचित्क्वचित् ।

प्रपञ्च्यते स्वशब्देन मूलग्रन्थानुसारतः ॥ २ ॥

End :

व्रीहितण्डुलगोधूमगुल्मौषधितृणाम्बुभिः ।

अथ क्षुद्रकर्मकालः ।

कुलिकस्यविरोयोगस्ताराबेनाधिकं कुजः ।

अष्टमो राशिरित्याद्याः काला...... ॥ कुलिका ॥

शक्रार्कदिग्गजरसाब्धि......

तिग्मकिरणात्कुलिका स्युरह्नि ॥

This work exclusively deals with times, its nature and auspiciousness for various ceremonies and trials also about the determination of the exact time of some festival. The author's name is not known. This appears to be an abridgment of Vidyāraṇyā's Kālamādhavīya otherwise called Kālanirṇaya.

18567 ॥ कालनिर्णयदीपिका ॥ (रामचन्द्रः)

KĀLANIRṆAYADĪPIKĀ—(RĀMACANDRA)

R. L. 190 P. 33 De. Gr.-750. Incomplete.

Beginning:

श्रीगणेशाय नमः ।

श्रीनृसिंहपदद्वन्द्वं नत्वा गणपतिं गुरुम् ।
रामचन्द्रोऽतिसंक्षिप्तं कुरुते कालनिर्णयम् ॥ १ ॥

तत्र कालो द्विविधः । नित्यः खण्डश्च । नित्यस्तु ईश्वररूप एव ।

"अनादिरेष भगवान्कालोऽनन्तोऽजरोऽमरः" इति वचनात् । खण्डः क्षणादिपरा....तः ।

End:

कृष्णचतुर्दश्या अपि पूर्वविद्धाया अलाभे परैव । एतद्विषयाण्येव "अष्टम्येकादशी षष्ठी कृष्णपक्षे चतुर्दशी ।
अमावास्या तृतीया च कर्तव्या परसंयुता ॥"

इति ब्रह्मवैवर्तादिवचनानि । रुद्रोपवासव्यतिरिक्ते तु उपवासे पक्षद्वयगतापि परैव ग्राह्या । "एकादश्यष्टमी षष्ठी...... ॥"

Colophon: (Sheet No. 32.)

इति त्रयोदशीनिर्णयः ॥

This is a work by the famous author of Prakriyākaumudī. He seems to have written many other works like "Vaiṣṇava-siddhāntadīpikā. The commentary of Narasimācārya for this work gives some particulars about this author. He is the son of Kriṣṇācārya and desciple of Gopālaguru. This author lived prior to Bhaṭṭoji Dīkṣita. One Ms. calls the author Rāmacandra and another names him as Rāmārya.

18568	B. L	213	P	170	De.	Complete (wants beginning)
18569	,,	209	,,	120	,,	Incomplete.
18570	J. L.	1378	,,	4	,,	,,

18571 ॥ कालनिर्णयदीपिकाविवरणम् ॥ (नृसिंहाचार्यः)

KĀLANIRṆAYADĪPIKĀVIVARAṆAM—

NṚSIHMĀCĀRYA.

B. L. 214 P. 216 De. Gr.-3450 Complete.

Beginning :

श्रीगणेशाय नमः । श्रीवनचामुण्डायै नमः ।

श्रीविठ्ठलं श्रुतिशिरःप्रथितप्रभावं

भावार्द्रमानससरोवरराजहंसम् ।

श्रीरामचन्द्रगुरुमेकमनेकशास्त्र-

पारीणकोविदधुरीणमहं नमामि ॥ १ ॥

येन व्याकरणार्णवैकतरणिः सा प्रक्रिया कौमुदी

वेदीतानुगता च वैष्णवमहासिद्धान्तसद्दीपिका ।

कालज्ञानविधौ व्यधायि विबुधानन्दि प्रबन्धत्रयं

कृष्णाचार्यसुतः स नः सुखयतु श्रीरामचन्द्रो गुरुः ॥२॥

End:

तज्ज्येष्ठभ्रातृपुत्रः परिकलितकलः श्रीगुरो रामचन्द्रात्

काव्यानां येन टीका व्यरचि स करुणाम्भोनिधिर्ज्ञानसिन्धुः ।

श्रीकृष्णाचार्यसंज्ञोगुरुरयमवतान्मां कृपाघनस्य

श्रीरामाचार्यसूनु विं(व)रणमकरोद्दीपिकाया नृसिंहः ॥ ६ ॥

Colophon:


इति श्रीमत्सर्वशास्त्रसकलागमनवाचार्यपरमहंसपरिव्राजकश्रीगोपाल-

गुरुपूज्यपादशिष्य श्रीरामचन्द्राचार्यसुतनृसिंहाचार्यकृतं कालनिर्ण-

यदीपिकाविवरणं समाप्तम् ॥ श्रीगुरुभ्यो नमः । श्रीसरस्वत्यै

नमः । श्रीगणेशाय नमः ॥

R.—This is a commentary on the work of his father by the son. He gives some verses containing the geneology but they are full of scriptorial blunders. The following may be gleaned.



The author mentions himself as the disciple of his paternal uncle's son Kṛṣṇācārya. The ancestors of this author are said to have been great authors.

18572 B. L. 125 P. 109 De. Complete

18573 ॥ कालादर्शः ॥ (आदित्यभट्टः)

KĀLĀDARŚAḤ—(ĀDITYABHAṬṬA)

R. L. 661 P. 223 De. Gr-3730. Complete.

Beginning:

श्रीगणेशाय नमः ।

ब्रह्मादयो यद्वशमायुगादिकालप्रभेदाश्च यदीयभेदाः ।
कालाथ कंसान्तकमूर्तयेऽहं नित्याय तस्मै प्रभवे नतोऽस्मि ॥

वाणीगणेशावमरेन्द्रमौलिमालिन्यनीहारितपादपद्मौ ।
अविघ्नमाविः कृतविश्वलोकमनोरथावन्महमानमामि ॥

विश्वेश्वराचार्यपदारविन्दप्रणामविस्तारितवाग्विलासः ।
आदित्यसूरिः स्मृतितत्त्वदर्शी कालं विनिर्णेष्यति मन्दबुद्ध्यै ॥

End:

सांवत्सरागमवचांसि च कालतत्त्वं
निर्णीयते स्म कृतिना कविवल्लभेन ॥ इति यज्ञकालनिर्ण-
यप्रकरणम् ॥

Colophon:

इत्यादित्यभट्टोपाध्यायस्य कविवल्लभापरनाम्नोगर्गतिलकस्य कृतिः
कालादर्शो नाम निर्णयः समाप्तः ॥

After the colophon there are some श्लोकाः are given as follows:—

भो कोविदाः कृतधियः कविवल्लभस्य
विज्ञापनं शृणुत वो रचितः प्रणामः ।
कालस्य निर्णयकरीं कृतिमस्मदीया-
मेतां निरस्तमदमत्सरमाद्रियध्वम् ॥ १ ॥

विज्ञानयोगिनो विश्वरूपाचार्यस्य निर्णयः ।
गृह्यस्य धर्मयोर्भाष्यं तथा स्मृतिमहार्णवम् ॥ २ ॥

विश्वादर्शं नित्यादर्शं च बलं स्मृतिचन्द्रिकाम् ।
अपरार्कं कल्पतरुं शिवस्वामिमतं तथा ॥
चौळरूपं स्मृति....जुषां मानवं मतं ।
स्मृतिसंग्रहं धर्मप्रदीपं कारणागमम् ॥
ज्योतिषाणि च शास्त्राणि वास्तुतन्त्रं समीक्ष्य च ।
न्यायैः सम्यग्विचार्यायं कालादर्शो मया कृतः ॥
अत्रत्य वचनानां ये मूलं पृच्छन्ति पण्डिताः ।
तेषां प्रेक्ष्या इमे ग्रन्था इति दत्तं मयोत्तरम् ॥ समाप्तोयम् ॥

In the above the author mentions some works which afforded him food in writing this work. There are Smṛti Mahārṇava, Smṛticandrikā and Dharmapradīpa among them. This author therefore should have flourished after Devaṇṇabhaṭṭa.

18574	B. L.	662	P.	168	De.	Complete.
18575	,,	663	,,	111	,,	,,
18576	,,	9436	Pl.	88	Gr.	,,
18577	J. L.	1379	P.	219	De.	,,

The date of transcription is :—

18575 शके १५९० कीलकाब्दे माघे मासि महाबळेश्वरशिवभट्टात्मजमल्लारिभट्टेन परोपकारार्थमिदं लिखितम् ॥

On the last page is seen:—

इदं कालादर्शपुस्तकं बाबाजीनायकानां

The Ms. is dated A. D. 1668 written by one Mallāri Bhaṭṭa and belonged to Bābājī Nāyak.

18578 ॥ जातकर्मकालादिनिरूपणम् ॥

JĀTAKARMAKĀLĀDINIRŪPAṆAM

Ms. 16839 Pl. 41 Te. Gr.-240. Incomplete.

Beginning:

....सुतजीवितविधानमुच्येतयमस्तथार्णवः

ततः क्षणादीनगणय्य तत्त्ववित् जन्मादि ...सुतोदये.... ॥ १० ॥

जातस्य पञ्चमदिने शुभदेमुहूर्ते पञ्चायुधाभरणधारणमिष्टमाहुः ।

नाभिप्रदेशपरिलंबिसुवर्णसूत्रं ...शिशोर्ग्रहनिवारणकैश्च युक्तम् ॥

End:

नक्षत्रद्वयंगाराग । तिथिद्वयंकारा....

18579 ॥ जन्माष्टमीनिर्णयः ॥ (विट्ठलेश्वरः)

JANMĀṢṬAMĪNIRṆAYAḤ—(VIṬHALEŚVARA.)

B. L. 204 P. 4 De. Gr.-82 Complete.

Beginning:

श्रीकृष्णाय नमः ।

प्रणम्य पितृपादाब्जयुगळं विगळन्मधु ।

जन्माष्टमीकाष्टमीति संशयान्नाशयाम्यहम् ॥ १ ॥

End:

तत्र यद्येतद्वचनं समूलकं सदा तथैव नोचेत्पूर्वोक्तरी-

तिरेवानुसर्तव्या ।

इति श्रीगोकुलाधीशप्रादुर्भावदिनव्रतम् ।

अस्माभिर्निर्णीयतेतत्पादाम्भोजप्रसादतः ॥

Colophon:

इति श्रीविट्ठलेश्वरविरचितो जन्माष्टमीनिर्णयः । श्रीमद्गोस्वामिपुरुषोत्त-

मचरणेभ्यो नमः ।

Remarks:—The Ms. is in good condition.

On the title page is given:—

"भास्कर जन्माष्टमीनिर्णयो गांभीरेः विटलकवि"

This author is the son of the great Vallabhācārya and is the same as the author of Vidvanmaṇḍana noticed under No

18580	B. L.	202	P.	4	De.	Complete.
18581	„	203	„	6	„	„

18582 ॥ तिथितत्त्वविवेचनम् ॥ (रघुनाथवाजपेययज्वन्)

TITHITATTVAVIVECANAM—

(RAGHUNĀTHAVĀJAPEYAYĀJIN.)

J. L. 1880 P. 36 De. Gr.-1000. Incomplete.

Beginning :

श्रीगणेशाय नमः ।

पितरं माधवमम्बां ललितां नारायणं पितृव्यं च ।
सहजमथ विश्वनाथं गणपतिमग्निं च शारदां नत्वा ॥ १ ॥
रामं च सीतयोपेतं रघुनाथेन रच्यते ।
साम्राट्स्थपतिना सम्यक् कालतत्त्वविवेचनम् ॥

End :


सार्धयामात्रयमिता प्रतिपद्वृद्धिगामिनी ।
तदोत्तराप्रदोषेतत्प्रतिपद्येन चान्यथा ।
पूर्वस्यामेव भद्रांतरोंपस्यादिति निर्णयः ॥

Colophon :

इति श्रीमत्संराट्स्थपतिरघुनाथवाजिपेययाजिकृतौ नानातिथिसाम्ब-कौमुदी होळिकोत्सवनिर्णयः समाप्तः । समाप्तोयं ग्रन्थः । साम्ब-सदाशिवार्पणमस्तु । श्रीकृष्णार्पणमस्तु । श्रीरामार्पणमस्तु । श्रीरामायनमः ।

The author calls himself a "Sthapati." It might be that the author performed the sacrifice called 'Bṛhaspatisava and therefore had that title. The author in the first verse

gives the names of his relations.



18583 ॥ तिथिनिर्णयः ॥ (भट्टोजिदीक्षितः)

TITHINIRṆAYAḤ—BHAṬṬOJIDĪKṢITAḤ

B. L. 85 P. 69 De. Gr.-915. Complete.

Beginning :

श्रीगणेशाय नमः । श्रीहनुमते नमः । चैत्रशुद्धशुक्लप्र-

तिपदि वत्सरारम्भः । तत्रौदयिकी तिथिर्ग्राह्या ।

चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ।

शुक्लपक्षे समग्रं तु तदा सूर्योदये सतीति ॥ हेमाद्रौ ब्राह्मोक्तेः ॥

End :

अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव ॥ इति दिक् ॥

इति होळाकानिर्णयः ।

Colophon:

इति पदवाक्यप्रमाणज्ञ श्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन वि-
रचितः तिथिनिर्णयः समाप्तः ॥

Subject : Tithinirṇayaḥ, dealirg with the rites conneted with different days.

R.—The Ms. is in good condition.
This is by the famous Vaiyākaraṇa.

18584	B. L.	86	P.	54	De.	Complete.
18585	,,	12319	,,	3	,,	Incomplete.
18586	T. S.	525	,,	37	,,	,,
18587	S. K.	162	,,	17	,,	,,

18585 "नारायणभट्टेनलिखितम्" श्रीवेङ्कटेशाय नमः ॥
श्रीनृसिंहाय नमः" ॥

18586 "रंगभट्टद्रव्येण क्रीतम्"

18588 ॥ तिथिनिर्णयः ॥ (तिम्मणाचार्यः)

TITHINIRṆAYAḤ—TIMMAṆĀCĀRYAḤ.

B. L. 191 (a) P. 5 De. Gr.-80 Complete.

Beginning :

श्रीगणेशाय नमः । तिथिनिर्णयः । संवत्सरप्रतिपदुदय व्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तौ परैव । चैत्रशुक्लतृतीया सा चतुर्थीयुता ग्राह्या ॥

End:

यदा तु पूर्वदिने चतुर्दशी प्रादोषव्यापिनी परदिने पूर्णिमा सायाह्नगात्तदा केषां चिन्मते परदिने केषां चिन्मते तु तत्रैव उभौ मुख्यौ कार्यौ ॥

18589	B. L.	192 a	P.	5	De	Complete.
18590	,,	192 b	,,	3	,,	,,

18591 ॥ तिथिवाक्यनिर्णयः ॥—नारायणभट्टः

TITHIVAKYANIRṆAYAḤ—NĀRĀYAṆABHAṬṬAḤ.

B. L. 150 P. 35 De. Gr.-600. Incomplete.

Beginning:

श्रीगणाधिपतये नमः ।

नमस्कृत्य गणेशं च व्यासादिसकलान्मुनीन् ।
धर्मप्रवृत्तिको वाक्यनिर्णयो लिख्यतेऽधुना ॥ १ ॥

नानास्मृतीः समालोक्य नानाधर्मप्रकाशनीः ।
तत्रतत्रोक्तनिर्णीत धर्मवाक्यप्रदीपकाः॥ २ ॥

प्रतिपद्दर्शपर्यन्ततिथीनां निर्णयस्तथा ।
नानास्मृत्युक्तनिर्णीतिवाक्यसंग्रहः (?) लिख्यते ॥ ३ ॥

तत्रादौ निमेषादिकालनिर्णयमाह—

End:

अन्यच्च—

षष्ठ्या स्यात्सप्तमीयोगे वारश्चेदंशुमालिनः ।
योगोयं पद्मको नाम सहस्रार्कग्रहैः समः ॥ ८ ॥

18592	B. L.	196	P.	25	De.	Complete.
18593	,,	12323	,,	34	,,	,,
18594	Ms.	16340	,,	2	,,	Incomplete.

18595 ॥ दशकालनिर्णयः ॥

DAŚAKĀLANIRṆAYAḤ.

B. L. 9293 Pl. 105 Te. Gr-3000 Incomplete.

Beginning :

श्रीगणेशाय नमः ॥

नमस्ते रमाधीशपुंसे परस्मै
नमस्तेदिगीशादिदेवार्चिताङ्घ्रे ।
नमस्ते मुकुन्दारविन्दाक्षविष्णो
नमस्ते समस्तेश मह्यं प्रसीद ॥ १ ॥

दशार्द्ध...दशनिर्णयातादि
ख्यातानुबन्धिस्मृतिसंनिबन्धः ।

सर्वैर्दिकैर्वैदिकसार्वभौमैः

संगृह्यतां संग्रहसार्वभौमः ॥ २ ॥

End :

जयन्त्युपाकर्मविवाह्यकन्या, स्वाल्पदोषवर्ज्यान्नविशुद्ध-

दीपाः । तथो द्वै........................ ॥

18596	B. L.	9294	Pl.	125	Gr.	Complete.
18597	„	9295	„	130	„	Incomplete.

18598 ॥ दशम्यादिवेधनिर्णयः ॥ (विद्याधीशस्वामी)

DAŚAMYĀDIVEDHANIRṆAYAḤ—

VIDYĀDHĪŚASVĀMIN.

Ms. 16341 P. 4 De. Gr.-60 Complete.

Beginning:

श्रीगुरुभ्यो नमः ।

हर्यानन्दतीर्थार्यवेदव्यासगुरूनपि ।

नत्वा दिनत्रयं शक्त्या सूच्यते हि यथामति ॥ १ ॥

अरुणोदयवेलायामित्युक्तिमनुसृत्य तत् ।

विवृतं पण्डितार्यैस्तत्तदुक्तिमनुसृत्य च ॥ २ ॥

End :

एकद्विहीनवृत्रिद्विदिनेषु समेषु च ।

द्व्येकहीनः क्षयः प्रोक्तस्त्रिचतुश्च समक्षयः ।

अतिक्षयपञ्चषट्कमिति वेधस्तु सप्तधा ॥

18599 ॥ पञ्चकालक्रियादीपः ॥ श्रीनिवासाचार्यः

PAÑCAKĀLAKRIYADĪPAḤ—ŚRĪNIVĀSĀCĀRYAḤ.

B. L. 9329(a) Pl. 192 Gr. Gr.-3000. Complte.

Beginning:

यस्य लीला जगज्जन्म...

यैरकण्टकिता मार्गा देविकाः पाञ्चरात्रिकाः ।

कुमारतात...............

......चतुर्वेदि श्रीनिवासाचार्यदेशिकः ।

पंककालक्रिया....अभिधानादिरूपस्य प्रयोगोह्यभिधीयते ।

End:

शुश्रूषार्थं त्रयाणां वै शूद्राः सृष्टाः स्वयंभुवा ।

एवमेतज्जगत्सर्वं अग्निहोत्रकृते कृतम् ॥

नावबुद्ध्यन्ति ये चैव नराः सुतमसावृताः ।

ते यान्ति नरकं घोरं रौरवं नाम विश्रुतम् ॥

रौरवाद्विप्रयुक्तास्तु क्रिमि योनिं व्रजन्ति ते ॥

Colophon. (Leaf No. 188)

इति श्रीमद्रामानुजसिद्धान्तस्थापनाचर्यशतक्रतुचतुर्वेदिश्रीनिवासाचार्यविरचिते पञ्चकालक्रियादीपे योगनिरूपणाख्यः पञ्चमः परिच्छेदः ॥

R.—This is recopied in this Library.

After the colophon is given as follows:—

अनेकस्मृतिविज्ञेयकृत्याकृत्यप्रकाशकम् ।

पञ्चकालक्रियादीपमज्ञानध्वान्तरोधकम् ॥

शतक्रतुचतुर्वेदिश्रीनिवासार्यनिर्मितम् ।

सन्तः समीक्ष्य सन्तोषं प्राप्नुवन्ति विमत्सराः ॥

इति पंचकालक्रियादीपः संपूर्णः ॥ हरिः ॐ

The author appears the guru of the Tanjore Nāyak rulers because the name Kumāratāta also appears in the introduction as that was the name by which also he was known. This is a manual of the daily ritual of the Pāñcarātras.

18600	B. L.	9330	„	97	Gr.	Complete.
18601	„	9321(a)	„	167	„	„
18602	„	9321(b)	„	113	„	„
18603	„	9321(c)	„	53	„	Incomplete
18604	„	9329(घ)	„	19	„	„

18605 ॥ पर्वनिर्णयः ॥

PARVANIRṆAYAḤ.

N. S. 53 P. 25 De 750 Complete.

Beginning:

श्रीगणेशाय नमः । अथ पर्वनिर्णयः ॥ तत्र इष्टयङ्गत्वेन पर्वप्रतिपत्संधिस्तावत् श्रुत्या विहितः ॥

End:

गणेषु तु प्रथमस्याह्नः पर्वसंबन्धः दाशमिकन्यायेन प्रथमस्यैव विनिगमकत्वात् ॥

Colophon:

इति पर्वनिर्णयः ॥ समाप्तः पर्वनिर्णयः ॥ संवत् १८५६ अश्विनमासे शुक्लपक्ष्ये द्वितीयायां मंगळवासरे ॥

18606 G. K. D. 7 P. 16 De. Complete.

18607 ॥ मलमासाघमर्षणी ॥ (वासुदेवः)

MALAMĀSĀGHAMARṢAṆĪ—VĀSUDEVAḤ.

B. L. 618 P. 11 De. Gr.-275. Incomplete.

Beginning:

श्रीगणेशाय नमः ।

विजयदशीलं सद्यो निजपदपाथोजनियतचित्तानाम् ।
गजरिपुतः संजातं गजवरवदनं मुदा सदा वन्दे ॥

* *

दानवारिप्रभूताखित्रिलोकीशिवभूपतेः ।
गङ्गेव राजते यस्य कीर्तिः सर्वत्रलालिता ॥ ३ ॥
ततः त्रिपुरुषी यस्य पालिता पाल्यते च यः ।

* *

तत्र मासो नाम सूर्यादिग्रहपरिस्पन्दक्रियापरिमितका-लिविशेषः । मसीपरिमाण इति धातोः कर्मणि घञा तद-र्थलाभात् स चतुर्विधः ॥

End:

एवं च पूर्वोक्तसकलयुक्त्या मण्डलान्तमासत्वपक्षस्थ निर्णयसिन्ध्वादिमहानिबन्धनकर्तृभिसततत्वेन च प्रकृतवहु-धसंवत्सरे यथोक्तमाश्विनोऽधिकसंसर्पाख्यः ततः पौषः क्षयः ततः शुभकृद्वर्षे चैत्रोऽधिक इति सिद्धम् ॥

रचितो वासुदेवेन क्षयमासस्य निर्णयः ।
शोधितो वामदेवादि नानाविबुधमण्डलैः ॥ १ ॥
दोषो यद्युपलभ्येत सोऽप्यनापाततो यदि ।
निश्चित्य लेख्यतां शीघ्रमाग्रहो नात्र गृह्यते ॥ २ ॥
इत्थं क्षयाधिमासानां दिङ्मात्रमिह दर्शितम् ।
देवो मध्वहितस्तेन प्रीतो दिशतु मङ्गलम् ॥ ३ ॥

R.—The last of the Mahratha Rājas of Tanjore is mentioned by the author.

18608	B. L.	614	P.	6	De.	Incomplete
18609	„	615	„	14	„	„

18610	B. L.	616	P.	16	De.	Incomplete.
18611	,,	617	,,	48	,,	,,
18612	,,	619	,,	10	,,	,,
18613	,,	620	,,	9	,,	,,
18614	,,	621	,,	30	,,	,,
18615	,,	630 & 631	,,	13	,,	,,

18616 ॥ अघपञ्चषष्ठिव्याख्या ॥ (रामचन्द्रः)

AGHAPAÑCAṢAṢṬHIVYĀKHYĀ—RĀMACANDRA.

B. L. 9271 Pl. 19 Gr. Gr.-300. Complete

Beginning:

हरिः ॐ । शुभमस्तु ।

कल्याणाद्रिर्महाधीरः कल्याणगुणवारिधिः ।

कल्याणरामकृपया कल्याणानि करोतु नः ॥ १ ॥

श्रीरामभद्रं शिरसा प्रणम्य व्याख्यानमाख्याम्यघपञ्चषष्टेः ।

श्रीरामचन्द्रोऽहममन्दबुद्धिर्मन्दोपलब्धेश्च सुबोधसिद्ध्यै ॥

End:

अनुगमनादीनां न दोषः । विषादनं विषभक्षणं...

शस्त्रघातवत् शुद्धिरेव । हरिः ॐ ।

Colophon:

अघपञ्चषष्टेः टीका समाप्ता । विजयवर्षे தைமீ உகல शुक्लपक्षे

प्रथमे दिनं विषवैद्यं कृष्णन् எழுதினது शुभमस्तु ॥

R.—This is a commentary on Aghapañcaṣaṣṭhi of Viḻinātha a Pandit of these parts. For other particulars see under No. 4440 (Vol. VIII).

18617 B. L. 9467(ट) Pl. 20 Gr. Incomplete.

18618 ॥ अघपञ्चाशत् ॥

AGHAPAÑCĀŚAT.

18618 J. L. 1381 P. 5 De. Gr. 120 Incomplete.

Beginning:

सर्वः प्रांशुनृपाणि —

End:

आशौचं + पित्रादिकेभ्यः सदा ॥ ४३ ॥

R—A work of fifty verses about Āśauca. But this Ms. contains only 43 verses.

18619 ॥ अघविवेचनम् ॥ (रामचन्द्राध्वरिन्)

AGHAVIVECANAM—RĀMACANDRĀDHVARIN.

18619 B. L. 92/8 Pl. 7 Gr. Gr.-60. Complete

Beginning:

बहुस्मृतीः समालोक्य वाक्यैरघविवेचनम् ।

चतुर्षु मासेषु गर्भस्रावे पितुः स्नानमात्रम् ॥

End:

शुद्धा इति + बुभुत्सुभिः ॥

Colophon:

इति पदवाक्य + रामचन्द्राध्वरिणा विरचितेऽघविवेचने द्वितीयपरिच्छेदः । समाप्तोऽयं ग्रन्थः ॥

18620 B. L. 9167 Pl. 6 Gr. Complete.
18621 „ 11793b. „ 5 „ Incomplete.
18622 „ 9233 „ 10 „ Fragment.

18623 ॥ अघसारनिर्णयः ॥ (धर्मराजः)

AGHASĀRANIRṆAYAḤ—DHARMARĀJAḤ.

18623 B. L. 9275 P 318 Gr. Gr-4000. Incomplete.

Beginning:

हरिः ॐ । अघसारनिर्णयः ॥

शुक्लाम्बरधरं + शान्तये ॥

विघ्नेश्वराय नमः । श्रीदक्षिणामूर्तये नमः । श्रीमहास-

रस्वत्यै नमः । गुरवे नमः ।

वन्दे लोकस्य रक्षार्थं धर्मशास्त्रप्रवर्तकान् ।

पराशरमुखान्मुख्यान् मुनीन्वेदान्तपारगान् ॥

अतः परं प्रवक्ष्यामि ह्यघसारस्य निर्णयम् ।

End:

सुमन्तुः—

पंचमं पक्षमारभ्य यावत् वृश्चिकदर्शनात् ।

महाळयस्य कालोयं पितॄणां मोददायकम् ॥

तस्मात्सर्वप्रयत्नेन महाळयविधिं चरेत् ।

सर्वाभीष्टमवाप्नोति मोक्षं चान्ते न संशयः ॥

Colophon: (Leaf No. 160)

इति महोपाध्याय श्रीविश्वनाथसूनुना एरकरग्रामवासिना धर्म(राज) सूरिणा विरचिते अघनिर्णयसारे प्रथमः परिच्छेदः ॥ हरिः ॐ शुभमस्तु । श्रीरामाय नमः ॥

The author calls himself the son of Viśvanāthamahopādhyāya and mentions his village as Erakaram near Kumbakonam.

18624 ॥ अभिनवषडशीतिः ॥ (सुब्रह्मण्यः)

ABHINAVAṢAḌAŚĪTIḤ—SUBRAHMAṆYAḤ.

18624; P. A. No. 129 P. 17 . De Gr. 150 Incomplete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः । अभिनवषडशीतिप्रारम्भः ॥

वागीशवासुदेवादिवरदानविशारदम् ।
पाराचारमहं वन्दे वारणेन्द्राननं महः ॥ १ ॥

सौजन्यं सुमनोभिनन्द्यममृतं सत्त्वं तु वेलातटं
स्वाचारः सहजो महामधुर...माणां ध्रुवम् ।
यन्नाथः कुलदेवतापदमिति श्रीवेंकटेशो हरिः
सोऽयं सर्वप्रमोदमो विजयते पोन्दूरुवंशार्णवः ॥ २ ॥

सुधांशुस्तत्र संभूतः सुब्रह्मण्यः सुधीरिति ।
अजस्रपरिपूर्णाभिः कलाभिरुपशोभते ॥ ३ ॥

End:

सप्तमप्रभृतिसगोत्रत्वं विवाहोर्ध्वं तदपि नास्ति । भर्तृपक्षे सप्तपुरुषं सापिण्ड्यं । तत्र श्लोकः ॥

18625 ॥ आशौचतत्त्वम् ॥ (कविमहादेवः)

ĀŚAUCATATTVAM—KAVIMAHĀDEVAḤ.

T. S. 522 P. 12 Dē. Gr.-125 Complete.

Beginning:

श्रीगणेशाय नमः ।

सर्वः प्रांशुनृपाणि लभ्य कुसुमाकाङ्क्षीव मन्दोऽपि सन्
सत्संसद्युपहास्यतां कवियशः प्रार्थी गमिष्याम्यहम् ।
बद्धाञ्जल्यधुना तथापि भवतः संप्रार्थये संनतः
सम्यग्ग्रन्थमिमं विलोकयत भोः सन्तो भवन्तो यतः ॥ १ ॥

End:

दग्धव्यस्त्रिभिरग्निः सविधिना यश्चाहिताग्निर्मृतोऽ

भावे लौकिकवह्निना तु विधुरः स्मार्ताग्निना चाग्निमान् ।

सूत्याग्निं पतिताग्निमंत्यजचितापेध्यानलान्संत्यजे-

दानीतञ्चकुशेन्धनाज्यदहनैः दाह्योप्यदाहस्मृतः ॥ ५० ॥

Colophon:

पीतं येन समुद्रवारि सकलं गोत्रे तदीयेऽभवत्

सक्तो ब्रह्मणि विश्वनाथ इति यस्तत्सूनुना धीमता ।

आलोच्याखिलसूतकप्रकरणं श्लोका मयाष्टाधिकाः

चत्वारिंशदमी कृताः कविमहादेवेन संक्षेपतः ॥ ५१ ॥

18626 **B. L.** 251 **P.** 6 De, Complete

18627 ॥ **आशौचतत्त्वविवरणम्—समूलम् —** ॥ (शिवसूरिः)

ĀŚAUCATATTVAVIVARAṆAM—SAMŪLAM.

18627 **B. L.** 250 **P.** 42 De. Gr. 1600. Complete

Beginning:

श्रीगणेशाय नमः ॥

जनिमृतिहेतुं जगतां षडूर्मित्रिकृतिसमुदायनिर्मुक्तम् ।

सच्चित्सुखघनशुद्धं सोऽयं सोमार्द्धशेखरं वन्दे ॥ १ ॥

मन्वादिस्मृतिनिचयं निपुणं ज्ञात्वा गुरोर्मुखाम्भोजात् ।

आशौचतत्त्वविवृतिं त्र्यम्बकतनुजः शिवः कुरुते ॥ २ ॥

End:

अथ स्वस्य गोत्रस्य नामनी विवृण्वन् ग्रन्थमुपसंहरति ।

—(मूलम्) त्वात् यावद्वक्तुमशक्यत्वादिति भावः ॥

Colophon:

वृषसंवत्सरे मासि नभस्ये पौर्णिमातिथौ ।

तंजापुरे कृतः पूर्णो ग्रन्थोऽयं शिवसूरिणा ॥ १ ॥

धर्मतत्त्वस्य सूक्ष्मत्वात्प्रमादाद्वात्रविस्मृतम् ।

क्षमन्तां दयया सन्तो विद्यांकुर्वन्तु मे श्रमम् ॥ २ ॥

इति श्रीमत्र्यम्बकभट्टसुतेन महाजनोपनाम्ना शिवसूरिणा विरचितमा-शौचतत्त्वविवरणं समाप्तम् ॥

Remarks:—After the colophon is given some extract from Vaidyanathadīksitīya.

वैद्यनाथदीक्षितीये अंगिरो वचनम्—

'स्वल्पकाले मृताशौचे दीर्घं च जातकं भवेत् ।

* *

न तत्र जनानाशौचं मृतकेनैव शुध्यतीति ॥'

This is a commentary on Kavimahādeva's Āśaucatattva. The author of this work is an out and out Tanjorian where it is said that he composed it.

18628 B L 252 P. 83 De. Complete.

18629 ॥ आशौचदशश्लोकी ॥

ĀSUACADAŚAŚLOKĪ.

B. L. 9276 b Pl. 1 Gr. Gr. 12 Incomplete.

Beginning:

....तनयादिजातमरणे पित्रोः दशाहं...

चदपैति सूतकवशात् भ्रातुः दशाहं परम् ॥ १ ॥

End:

मातृभ्रातृपितृस्वसृश्वशुरतत्पत्न्यतिंगा... ।

...सुतयाज्यशिष्यगृहसंप्राप्तेषु चाज्ञातिषु ॥

18630 J. L. 1382 P. 9 De. Complete

18631 ॥ आशौचदशश्लोकीव्याख्या ॥ (भट्टोजिदीक्षितः)

ĀŚAUCADAŚAŚLOKĪVYĀKHYĀ—BHAṬṬOJIDĪKṢITA.

J. L. 1383 P. 8 De. Gr.-200 Complete.

Beginning:

श्रीगणे...अथ दश...ख्या ...पासत्रयपक्षे गर्भस्रावे...

End:

मृतशुद्धिस्तु पञ्चभिरित्यङ्गिरस्स्मरणात् ॥

Colophon:

इति + दशश्लोकीव्याख्यानं सम्पूर्णम् ॥

रुधिरोद्गारिवर्षे च पौषशुक्ले च पक्षके ।

पौर्णिमायां शिवेनैव लिखितं पुस्तकंत्विदम् ॥

18632 T. S 129 P. 4 De. Complete.

18633 ॥ अशौचविधिः ॥

ĀSAUCAVIDHIH.

B. L. 11430b Pl. 3 Gr. Gr-45 Incomplete.

Beginning:

यतीनां मरणे प्राप्ते स्पर्शदोषो न विद्यते ।

आशौचबुद्ध्या स्नातश्चेद्दिक्षु यात्रां चरेन्नरः ॥

ज्ञातिपुत्रकलत्राणां परित्राण्मरणे सति ।

आशौचं नास्ति वै तेषां स्नानमप्याचरेन्न तु ॥

End:

यतीन्द्राणां सिद्धौ संभूतायामपि ये धर्मशास्त्रग्रन्थप·

जानन्तो मूढा होमपूजादिषु संरक्ष्यन्ते तेषामेवदर्शनं श्रवणं स्मरणं च सचेलस्नानप्रापकमिति युक्तमुत्पश्यामः ॥

R.—This particularly refers to the pollution on the death of Sanyāsins.

18634	B. L. 11430c	Pl.	2	Gr.	Incomplete.

18635 ॥ आशौचविषयः ॥

ĀŚAUCAVIṢAYAḤ.

18635	B. L. 9277 (a)	Pl.	3	Gr. 75	Complete.

Beginning:

चतुर्थे मासि गर्भनाशस्य स्राव इति नाम । तस्मिन्सति पितुरेव स्नानम् । मातुः रजोवत् । ज्ञातीनां स्नानमपि नास्ति ॥

End:

तद्गृहवासे त्रिरात्रं तत्र भक्षणे दशरात्रम् । इदं च वेत्वनायादि(?)व्यतिरिक्तविषयं तद्विषये सद्यः शौचम् ॥

R:—The Ms. is in good condition. This and the following are extracts from bigger works.

18636	B. L.	9268	Pl.	2	Gr.	Incomplete.
18637	J. L.	1884	P.	6	De.	,,
18638	,,	1385	,,	4	,,	,,
18639	,,	1386	,,	4	,,	,,
18640	T. S.	351	,,	3	,,	,,
18641	,,	521	,,	5	,,	,,
18642	G. K. D.	18	,,	5	,,	,,

18643 ॥ आशौचनिर्णयः ॥ (त्र्यम्बकः)

ĀŚAUCANIRṆAYAḤ—TRYAMBAKAḤ.

18643	G. K. D. 11	P.	12	De.	Complete.

18644	T. S.	357	P.	9	De.	Complete.
18645	G. K. D.	9	„	4	„	Incomplete.
18646	„	10	„	6	„	„
18647	„	12	„	7	„	„
18648	„	18	„	5	„	„
18649	„	342	„	8	„	„

18650 ॥ आशौचनिर्णयः ॥ (हरिः)

ĀŚAUCANIRṆAYAḤ—HARIḤ

B. L. 253 P. 8 De. Complete

Beginning:

श्रीमदनन्ताय नमः । अथाशौचनिर्णयः । तत्र आ-
शौचं नाम पुरुषनिष्ठः कालस्नानाद्यपनोद्यः कश्चिद्भावरूपो
धर्मः । तत्राशौचं द्वेधा । जननाशौचं मरणाशौचं च ।

End:

धिया पूर्वनिबन्धानां मतमादाय वास्तवम् ।
आशौचनिर्णयोऽकारि हरिणा कृष्णसूनुना ॥

18651	B. L.	254	P.	9	De.			Complete.
18652	Ms.	16342	Pl.	27	Gr.	Gr.	300	Complete.

This is based on Vaidyanātha Dikṣita's work.

18653 ॥ आशौचनिर्णयः ॥

ĀŚAUCANIRṆAYAḤ.

18653 T. S. 343 P. 18 De. Gr.-250 Complete.

Beginning:

अथ जननाशौचम् ॥ तत्र आद्यमासत्रये गर्भस्रावे....

End:

कुमाराणां च बालानां भोजनं वस्त्रवेष्टनम् ।
यच्चोपजीवते बालस्तत्तद्विप्राय दीयते ॥ इति

18654 ॥ आशौचनिर्णयः ॥ (भट्टोजिदीक्षितः)

AŚAUCANIRṆAYAḤ—BHAṬṬOJIDĪKṢITA.

B. L. 89 P. De. Gr.-112 Complete.

Beginning:

श्रीगणेशाय नमः । पाराशरः—

'आ चतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः । अत ऊर्ध्वं प्रसूतिः स्यात् ।' इति । तत्र स्रावे आद्यमासत्रये मातुस्त्रिरात्रमाशौचम् । उपर्याषष्ठं माससमसंख्यादिनमाशौचम् । चतुर्थे चत्वारि पञ्चमे पञ्च षष्ठे षडित्यर्थः ॥

End:

तदुक्तं त्रिंशच्छ्लोक्यां— तातम्बाचार्यकेभ्योनयतिलजलदो ब्रह्मचारी तदीयाशौच इति प्रक्रान्तप्रायश्चित्तानामाशौचं नास्ति ॥ पूर्वसङ्कल्पितचौळोपनयनादिसंस्कारेषु यज्ञदेवताप्रतिष्ठारामाद्युत्सर्गादिष्वप्येवमिति ॥

Colophon

इति श्रीभट्टोजिभट्टकृताशौचनिर्णयः समाप्तः ॥

18655	B. L.	20	P.	7	De.	Complete.
18656	,,	91	,,	4	,,	,,
18657	J. L.	1387	,,	10	,,	,,
18658	,,	9266b	Pl.	12	Gr.	Incomplete.
18659	,,	1388	P.	4	De.	,,

18660	J. L.	1389	P.	5	.	De.	Incomplete.
18661	,,	1390	,,	4	,,	,,	

18662 ॥ अघनिर्णयः ॥ (वेङ्कटेशः)

AGHANIRNAYAH- VENKATEŚAH.

B. L. 9266(2) Pl. 20 Gr. Gr.-125. Complete.

Beginning:

हरिः ॐ । शुभमस्तु । आशौचशतकम् ॥

सुरासुरशिरोरत्नं ब्रह्मरुद्रादिवन्दितम् ।

प्रणम्य पुण्डरीकाक्षं वक्ष्याम्याशौचनिर्णयम् ॥

निमित्तं पिण्डदानादेः पुरुषस्वमशुद्धिकृत ।

कालस्तानापनोद्यं यत्तदाशौचमितीर्यते ॥ १ ॥

End:

हारीतवेंकटाचार्यः श्रुतिस्मृतिविचक्षणः ।

व्यर्क्ष श्लोकशतेनेत्थमकरोदघनिर्णयम् ॥ ११० ॥

स्मृतिः क्व च...वा चरितमत्र मृग्यं क्वचि-

त्कथंचिदपि चेत्त्रयी न खलु लक्षणं शास्त्रवित् ।

तदेतदखिलाश्रयो विजयतेऽद्य विद्यानिधिः

सुधीः परमवैदिकः स हि सरस्वतीवल्लभः ॥

हरिः ॐ । शुभमस्तु । श्रियै नमः ॥

The author belongs Haritagotra and the work is called Aghanirṇaya consisting a centum of verses. From the colophon of this as also of the next work which is its commentary it appears that the author himself wrote the commentary also. The following is the geneology:—

Sarasvatīvallabha

|

Ranganātha

|

Venkaṭeśa

18663	B. L. 9278ग	Pl.	6	Gr.	Complete.
18664	,, 9276c	,,	9	,,	,,
18665	,, 9277b	,,	8	,,	,,
18666	G. K. D.13	P	5	De.	,,
18667	,, 9495b	Pl.	6	Gr.	,,

18668 ॥ अघनिर्णयव्याख्या ॥ (वेङ्कटेशः)

AGHANIRṆAYAVYĀKHYĀ—VEṄKAṬEŚA.

B. L. 9276a Pl. Gr. Gr.-2000. Complete.

Beginning:

हरिः ॐ ।

मुकुन्दमरविन्दाक्षमिन्दिरेशमरिंदमम् ।

वन्दस्वदेयवन्दारुवृन्दारकमनिन्दितम् ॥

अशक्तोऽपि सदाचारश्रद्धयोत्थाप्य चोदितः ।

विष्णुना विप्ररूपेण पुनरप्यनुशासितः ॥

उद्धरेयमहं विष्णोः प्रसादादघनिर्णयम् ।

तस्येदानीं यथावृत्तं व्याख्यामाख्यातुमुत्सहे ॥

End:

सरस्वतीवल्लभसूरिपौत्रः श्रीरङ्गनाथस्य सुतः सुशीलः ।

यजुर्निधिर्वाकृतवेंकटेशो विष्णोः प्रसादादघनिर्णयं सः ॥

Colophon:

इति हारीतवंशश्रीरङ्गनाथार्यपुत्रसरस्वतीवल्लभापरनामधेयश्रीवेंकटेश विरचिता स्मृतिसारसर्वस्वसमाख्या अघनिर्णयव्याख्या समाप्ता ॥ हरिः ॐ । शुभमस्तु । अस्मद्गुरुभ्यो नमः । श्रीसरस्वत्यै नमः । श्रीमन्नारायणाय नमः । श्रीराजगोपालाय नमः ।

18669	B. L.	9270	Pl.	82	Te.	Complete.
18670	,,	9271	,,	154	Gr.	,,
18671	,,	9274	,,	118	,,	,,
18672	,,	9279	,,	70	,,	,,
18673	,,	9273b	,,	19	,,	Incomplete

18674 ॥ आशौचशुद्धिनिर्णयः ॥ (सर्वक्रतुवाजपेययाजी)

ĀŚAUCAŚUDDHINIRṆAYAḤ—

SARVAKRATUVĀJAPEYAYĀJĪ.

B. L. 9267 Pl. 74 Gr. Gr.-1500 Complete.

Beginning:

हरिः ॐ । आशौचशुद्धिनिर्णयः ।
विश्वेश्वरं परं ब्रह्म ब्रह्माच्युतमहेश्वरान् ।
प्रणम्य देवीं धर्मं च क्रियते शुद्धिनिर्णयः ॥

End :

.........तु त्र्यवरान् ब्राह्मणान्भोजयेदिति ॥

18675 ॥ त्रिंशच्छ्लोकी ॥ (बोपदेवः)

TRIMŚACCHLOKĪ—BHOPADEVAḤ.

T. S. 344 P. 3 De. Gr.-75. Complete.

There is a work under the name of Trimśigrantha by Bopadeva which deals with this same subject. This is a similar work. Vijñāneśvara is credited with a commentary on this work. A work with this name is published at Benares and Bombay with a commentary of Nāgeśabhaṭṭa.

18676	T. S.	493	P	3	De.	Incomplete.
18677	„	530	„	4	„	„

18678 ॥ त्रिंशच्छ्लोकीभाष्यम्—समूलम् ॥ (विज्ञानेश्वरः)

TRIMŚACCHLOKĪBHĀṢYAM—SAMŪLAM—

VIJÑĀNEŚVARAḤ.

B. L. 245 P. 19 De. Gr.-576 Complete.

Beginning:

श्रीगणाधिपतये नमः । सरस्वत्यै नमः । गुरुभ्यो नमः ।
अविघ्नमस्तु ॥

नत्वा गणेश्वरं देवं शारदां गुरुमात्मनः ।
आशौचसंग्रहत्रिंशच्छ्लोक्या व्याख्यां करोम्यहम् ॥

End:

आचम्याग्न्यादिसलिलं गोमयं गौरसर्षपान् ।
प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैरिति ॥ ३० ॥

18679	B. L.	246	P.	44	De.	Complete.
18680	„	247	„	24	„	„
18681	„	248	„	24	„	„
18682	„	249	„	14	„	„
18683	G. K. D	21	„	36	„	„
18684	„	22	„	25	„	„
18685	P. A.	130	„	32	„	„
18686	T. S.	491	„	45	„	„

18687 ॥ त्रिंशच्छ्लोकीवृत्तिः ॥ (रामेश्वरभारती)

TRIMŚACCHLOKĪVṚTTIḤ.—RĀMEŚVARABHĀRATĪ.

B. L. 9272 Pl. 36 Te. Gr-700. Complete.

Beginning:

श्रीगुरोः करपादाब्जपरागाः पान्तु पावनाः ।
निस्तमस्कसदानन्दसाक्षात्करणहेतवः ॥
दानादिका गृहस्थस्य विहिता त्रिविधाः क्रियाः ।
तत्राधिकारसंकोच...शौचावबोधिनी ॥

End:

दत्त्वा पिण्डं स पिण्डाः * *
विज्ञानेश्वरमालोक्य माधवीयं च चन्द्रिकाम् ।
समगृहीतसारोऽत्र श्रोत्रियैर्धार्यतामिदम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरभारतीविरचिता त्रिंश-
च्छ्लोकीवृत्तिः समाप्ता ॥

R:—The Ms. is in a good condition. This is a Vṛtti to Triṁśacchlokī written along the lines adopted by Vijñāveśvara in his commentary.

18688 ॥ षडशीतिः ॥ (कौशिकादित्यः)

SAḌAŚĪTIḤ—KAUŚIKĀDITYA.

B. L. 255 P. 10 De. Gr-90. Complete

Beginning:

श्रीभवानी प्रसन्न ।
अनेकमुनिवाक्यानि संगत्यादाय केवलम् ।
संगृह्य कौशिकादित्यो लिखत्याशौचनिर्णयम् ॥

End:

अस्नानभोजिनो ये च ये च होमविवर्जिताः ।
नास्तिकाः किं भविष्यन्ति तेषां तस्मादसूतकाः ॥ ८२ ॥

This work is a compendium purporting to contain 86 verses dealing with Āśauca but this Ms. contain 91 verses. Abhinavaṣaḍaśīti is planned after this work.

18689	B. L.	9280	Pl.	6	Te.	Complete.
18690	G. K. D.	20	P.	8	De.	„

18691 ॥ षडशीतिव्याख्या—समूला (लक्ष्मीनृसिंहः)

SAḌAŚĪTIVYĀKHYĀ.

LAKṢMĪNṚSIMHAH.

	B. L.	9281	Pl.	24	Te.	Gr-400.	Complete.
18692	B. L.	9282a	Pl.	14	Te.		Complete.
18693	T. S.	338	P.	14	De.		„
18694	G. K. D.	8	„	12	„		„
18695	„	19	„	13	„		„

18696 ॥ अनुभोगकल्पतरुः ॥ (जगन्नाथः)

ANUBHOGAKALPATARUH—JAGANNĀTHAH.

B. L.	677	P.	8	De.	Gr-150.	Complete.

Beginning:

निबन्धनानि सर्वाणि पूर्वेषां च विपश्चिताम् ।

आलोच्याथ जगन्नाथविदुषा न्यायसिद्धये ॥

End:

निरुक्तं उद्दिष्टग्रामीयशाश्वानगरवेदासन्नक्षेत्रम् अनि-
रुक्तं उद्दिष्टग्रापयोदासनिदूरतरक्षेत्रं । इता ? शब्दः समु-
दाय परम् क्षीणशब्दो व्याचष्ट इति स्पष्टम् ॥

18697	B. L.	12320	P.	9	De.	Incomplete.
18698	M. S.	16343	„	10	„	„

18699 ॥ कर्मविपाकचिकित्सामृतसागरः ॥ (देवीदासः)

KARMAVIPĀKACIKITSĀMṚTASĀGARAḤ—

DEVĪDĀSA.

B. L. 127 P. 259 De. Gr.-8200 Complete.

Beginning:

ज्वरोऽतिसारग्रहणी अर्शो जीर्णविषूचिका ।

अलसश्च विलम्बी च कृमिरुक्पाण्डुकामलाः ॥

End:

सनीलैर्भृङ्गकासीसैरक्षतैलं विपाचयेत् ।

लोहभाण्डस्थितं मासमकालपलितं जयेत् ॥

एतदभ्यङ्गमात्रेण नावते न च कालजम् ॥

Colophon: (Sheet 258)

इति श्रीपण्डितदेवीदासविरचिते चिकित्सामृतसागरे क्षुद्ररोगचिकित्सा नाम सप्तषष्टितरङ्गः ।

This work is of the nature of a medical treatise in asmuch as it deals also with particular remedies for particular deseases but mainly deals with acts of man and their results.

18700 B. L. 128 P. 1-2 De. Complete.

18701 कर्मविपाकप्रायश्चित्तसुधानिधिः—(सायणः)

KARMAVIPĀKAPRĀYAŚCITTASUDHĀNIDHIḤ.

SĀYAṆA.

B. L. 9331a Pl. 55 Gr. Gr.-1000 complete.

Beginning.

जीयाद्दन्तिमुखो यस्य लीलयाजाण्डखण्डने ।

कन्दाङ्कुरवदाभाति दन्ताग्रं तद्बहिर्गतम् ॥

चिदानन्दकलां वाणीं वन्दे चन्द्रकलाधराम् ।
नैर्मल्यतारतम्येन बिम्बितां चित्तभित्तिषु ॥

अस्ति श्रीसङ्गभूपालः पृथ्वीतलपुरन्दरः ।
यत्कीर्तिमौक्तिकादर्शे त्रैलोक्यं प्रतिबिम्बते ॥

यशः क्षीराहुतीं हुत्वा यत्प्रतापहुताशने ।
परे यान्ति पदं दिव्यं राजानो रणदीक्षिताः ॥

पूर्णं कर्णान्तिकं प्राप्ते यत्प्रतापधनञ्जये ।
पुरे निधाय गाङ्गेयं स्वात्मानं रक्ष्यते परैः ॥

तस्य मन्त्रिशिखारत्नं अस्ति मायणसायणः ।
यः ख्यातिं रत्नगर्भेति यथार्थयति पार्थवीम् ॥

यत्कीर्तिजानाविस्पृक्तौकीर्तिविद्विषतामपि ? ।
कलिन्दनन्दिनी कान्तिस्पर्धयेव प्रपद्यते ॥

येन निर्मीयते नित्यं धनैरायोधनैरपि ।
श्रेयसे यशसे दानं विदुषां विद्विषामपि ॥

न ध्यानं न व्रतं नार्चा न समाधिर्न वा जपः ।
मन्त्रसिद्धिर्बलं यस्य मतिरेव महीयसी ॥

तेन मायणपुत्रेण सायणेन मनीषिणा ।
ग्रन्थः कर्मविपाकाख्यः क्रियते करुणावता ॥

End:

एवं कृते समाप्नोति नीरोगत्वं नरो ध्रुवं ।
आरोग्ययुक्तं नित्यं स सुचिरं सुखमेधते ॥


इत्यान्त्रवृद्धिहरप्रकरणम् ॥

Colophon:

इति श्रीमाधवभोगवनाथसहोदरस्य मायणनन्दनस्य सायणस्य कृतिः कर्मविपाकप्रायश्चित्तसुधानिधिः समाप्तः ॥

अखिलनिखिलपापानां निष्कृतिं ज्ञानकारणम् ।
जीयात्कर्मविपाकाख्यो ग्रन्थः सायणनिर्मितः ॥

This is a work by Sāyana the famous author of Vedabhāṣya and brother of Mādhava--Vidyāraṇya. He mentions his geneology thus



This Bhoganātha is also called Yoganātha. The introductory verses and the colophon must be eye openers to those who even now believe that Sāyaṇa & Madhava are identical.

18702	B. L.	73	P.	27	De.	Incomplete.
18703	,,	73	,,	26	,,	,,
18704	,,	9334	Pl.	25	Te.	,,

18705 ॥ कर्मविपाकार्कः ॥ (शङ्करः)

KARMAVIPĀKĀRKAḤ—ŚAṄKARAḤ.

B. L 57 P. 166 De. Gr.-2565 Incomplete

Beginning:

दिवाकरपदद्वन्द्वं फलद्वन्द्वप्रदायकम् ।
त्रैलोक्यतमसो नाशकर्तृ तत्प्रणमाम्यहम् ॥ १ ॥

भाट्टे भट्टद्वितीयः श्रुतिनिचयविदामद्वितीयोऽग्रगानां
भट्टश्रीनीलकण्ठो निजकुलजलधेरुद्गतः पूर्णचन्द्रः ।
तत्सूनुः शंकराख्यस्तदमलचरणाद्वन्द्वमालम्ब्य कुर्वे
प्राचीनैनस्तमिस्रं दळयितुमखिलं कर्मपाकार्कमेनम् ॥ ४ ॥

End:

विष्ठायाः कुरुते यस्तु ग्रहो गृह्णाति वायसः ।

आध्मानी त्वाप्यरुचिमान्पाददाही च जायते ॥ १ ॥

Remarks:—The Ms. is in good condition. The author mentions his father as one Nīlakaṇṭhabhaṭṭa a great Mīmāmsaka. The work is similar to Karmavipāka.

18706	B. L.	58	P.	114	De.		Incomplete.
18707	„	64	„	160	„		„
18708	„	67	„	175	„		„

18709 ॥ कर्मविपाकविषयः ॥

KARMAVIPĀKAVIṢAYAḤ—

B. L. 74 P. 400 De. Gr.-5000 complete.

Beginning:

अथ कर्मविपाकाभिप्रायेण ज्वरस्य प्रतीकारः । यथाह मार्कण्डेयः—

ये पुनः पूर्वजन्मनि क्रूराः पिशुनचेतसः

तेऽन्यजन्मनि संततज्वरवन्तः स्युः ।

End: (Sheet No. 30)

तथा च महाफलतस्करः पादव्रणी भवति । तथा च यश्चाण्डालादि वचः...... ॥

18710 ॥ महार्णवकर्मविपाकः ॥ (विश्वेश्वरः)

MAHĀRṆAVAKARMAVIPĀKAḤ—VIŚVEŚVARAḤ.

B. L. 62 P. 210 De. Gr.-6700 complete.

Beginning:

नमः सकलकल्याणभाजनाय पिनाकिने ।

नमो लक्ष्मीनिवासाय देवतायै गिरे नमः ॥ १ ॥

End:

महार्णवाख्ये महिते प्रबन्धे मांधातृनाम्नो मदनात्मजस्य ।

सत्कर्ममाणिक्यगणेन पूर्णे पूर्णोऽभवद्द्वादशकस्तरङ्गः ॥ ४ ॥

Colophon:

इति श्रीपेद्दिभट्टात्मजभट्टविश्वेश्वरविरचिते श्रीपण्डितपारिजातकठो-रमल्लेत्यादिबिरुदावळिविराजमानश्रीमदनपालपुत्रस्य मान्धातृनाम्नो निबन्धे महार्णवाभिधाने कर्मविपाके ग्रहप्रकरणं नाम द्वादशस्तरङ्गः ।


महार्णवाभिधानः कर्मविपाकः समाप्तः । श्रीरस्तु ।

वर्षे नन्दननामनि वर्षतौं भालतोय (१६३४) शकभाद्रे ।
दक्षिणमार्गे पूषणि कन्यायां कृष्णपक्षसप्तम्याम् ॥ १ ॥

तञ्जानामनि नगरे तुळजाराजप्रभोरनुज्ञातः ।
श्रीवेंकटेशलिखितः कर्मविपाको महार्णवो जयति ॥ १२ ॥

साम्बसदाशिवार्पणमस्तु । भालतोयशके १६३४

Both from the introductory verses and the colophon it is found that this work was written by the author and dedicated to a king Māndhātā son of Madana whose geneology is given as follows:—



This author wrote also a commentary called Subodhinī on Kullūkā's vyākhyā on Manusmṛti.

The Ms. belongs to Tulajārājā and copied by one Veṅkaṭeśa in A. D. 1712.

18711	B. L.	63	P.	136	De.	Complete.
18712	,,	66	,,	217	,,	,,
18713	,,	9261	Pl	216	Te.	,,
18714	,,	9262	,,	170	,,	,,
18715	,,	9263	,,	209	Gr.	,,
18716	,,	9260	,,	137	Te.	Incomplete.
18717	,,	9264	,,	197	Gr.	,,
18718	B. L.	59	P.	97	De.	Fragment.
18719	,,	8923	,,	3	,,	,,
18720	,,	9265	Pl.	14	Te.	,,
18721	,,	11053i	,,	17	Gr.	,,

18722 ॥ कामन्दकीयनीतिसारः ॥ (कामन्दकः)

KĀMANDAKĪYANĪTISĀRAḤ—KĀMANDAKAḤ.

B. L. 611 P. 132 De. Complete.

18723	B. L.	612	P.	78	De.	Complete.
18724	,,	5045	,,	52	,,	,,
18725	,,	12343	,,	39	,,	,,
18726	,,	12344	,,	100	,,	,,
18727	,,	12345	,,	69	,,	,,

R:—18126 After the colophon is given:—
' नम्रपृष्ठकाटिग्रीव + परिपालयेत् '

18728 ॥ कामन्दकीयनीतिसारव्याख्या ॥ (वरदराजभट्टः)

KĀMANDAKĪYANĪTISĀRAVYĀKHYĀ—
VARADARĀJABHAṬṬAḤ.

B. L. 9326 Pl. 119 Gr. Gr.-2200 Incomplete.

Beginning:

विधये विधेरपि सदा मृत्योरपि मृत्यवे पिनाकभृते ।

उशनोबृहस्पतिभ्यां नमोऽस्तु दैत्यामरगुरुभ्याम् ॥

End:

इदानीं कृतसंधौ ज्या...संधायतं प्रविश्य प्रयत्नवत् ।

यथा साऽनुगन्तव्यो यथा....नुयात् । बलीयसा समग्र-

शक्तिना रिपुणा संधायापि तं वा....रणं प्रविश्य इत्याह

...तथानुगन्तव्यः । अनुसरणीयः ॥

Colophon: (Leaf No. 110)

इति श्रीवरदराजभट्टारकयज्वविरचिते कामन्दकीयव्याख्याने नवप्र-

काशे मण्डलचरितं त्रयोदशं प्रकरणम् । कामन्दकीयेऽष्टमः सर्गः ॥

18729 B. L. 6227 Pl. 110 Te. Gr.-2200 Incomplete.

18730 ॥ चाणक्यनीतिसारः ॥ (चाणक्यः)

CĀṆAKYANĪTISĀRAḤ—CĀṆAKYAḤ.

Remarks:—The Ms. is in good condition. Some scholars identify Kautilīya Arthaśāstra with Cāṇakya Nītiśāstra. There are many good editions of this work notable among them being from the Mysore Oriental Library publications and in the Calcutta Oriental Series. There is an European edition printed at Leipzig in 1907 by E. Leumann

18730	B. L.	5117	P.	42	De.	Incomplete.
18731	,,	5118	,,	28	,,	,,
18732	,,	5119	,,	27	,,	,,
18733	,,	5120	,,	20	,,	,,
18734	,,	5031	,,	4	,,	Fragment.
18735	,,	5121	,,	8	,,	,,
18736	,,	5122	,,	12	,,	,,

18737 ॥ बुधभूषणम् ॥ नीतिमञ्जरी (शम्भुराजः)

BUDHABHŪṢAṆAM—NĪTIMAÑJARĪ—ŚAMBHURĀJAḤ.

B. L. 536 P. 31 De. Gr.-1085 Complete.

Beginning:

श्रीगणेशाय नमः ॥

प्रसन्नवरदं रामं निधाय हृदि केशवः ।

धर्मकल्पलतासिद्ध्यै तनुते नीतिमञ्जरीम् ॥

End:

तथा मात्स्ये—

यो वध्यस्य वधे तावान् तावान् वध्यस्य रक्षणे ।

अधर्मो नृपतेर्दृष्ट एतयोरुभयोरपीति ॥

Colophon:

इति श्रीमन्महाराजाधिराजक्षत्रियकुलावतंससिंहासनाधीश्वरश्रीशंभुराजच्छत्रपतिविरचिते ग्रन्थे बुधभूषणाख्ये श्रीमत्पुरोहितदामोदरभट्टात्मजकेशवपण्डितविरचितधर्मकल्पलतांतर्गतनीतिमञ्जर्यां, दण्डनीतिप्रकरणम् ॥ शके राज्याभिषेकीये दुन्दुभिसंवत्सरे लिखितमिदं पुस्तकम् ॥ श्रीरस्तु । श्रीरामाय नमः ॥

From the colophon it can be gleaned that Śambhājī the son of Śivāji was the author of a work by name Budhabhūṣaṇa for which one Keśavabhaṭṭa son of Dāmodarabhaṭṭa wrote a commentary called Dharmakalpalatā and that this Ms. was a portion on Daṇḍanīti.

The Ms. belongs to Bābājī Nāyaka Puṇḍe.

18738 B. L. 9258 Pl. 81 Gr. Complete.

18739 ॥ राजधर्म ॥ (व्यासः)

RĀJADHARMAḤ—VYĀSAḤ.

18739 B. L. 230 P. 69 De. Complete.

18740	B. L	16344	P.	4	De.	Incomplete.
18741	,,	16345	,,	7	,,	,,
18742	,,	16346	,,	47	,,	,,
18743	,,	16347	,,	2	,,	,,
18744	,,	16348	,,	12	,,	,,
18745	,,	16349	,,	9	,,	,,
18746	,,	16350	,,	8	,,	,,
18747	,,	16351	,,	17	,,	,,

18748 ॥ राजधर्मकौस्तुभः ॥ (अनन्तदेवः)

RĀJADHARMAKAUSTUBHAḤ—ANANTADEVAḤ.

B. L. 411 P. 83 De. Gr.-1300 Complete.

Beginning:

दिवाकरनिशाकराः पवनविद्युतस्तारका

यदीयपरतेजसा जगति सत्प्रकाशक्षमाः ।

यदात्मसुखलेशतः सुखिन आह वेदोपरा ?

धनंजयजयप्रदं जयति सूतवेषं महः ॥ १ ॥

End:

बाजबाहदुरचन्द्रभूपतेः कौस्तुभेऽत्र नृपधर्मगोचरे ।

दीधितिः प्रथमभाग इदृशस्तोषकृत्सुकृतिनां व्यजायत ॥

Colophon:

इति श्रीमत्सकलभूमण्डलमण्डनायमानबाजबाहुदुरचन्द्रदेवाज्ञाप्रवृत्तेन विद्वन्मुकुटशिरोमणि श्रीमदापदेवसुतेन अनन्तदेवेन कृते राजधर्म-कौस्तुभे प्रथमदीधितिः समाप्ता ॥

18749	B. L.	412	P.	56	De.	Complete.

18750 ॥ राजधर्मसारसङ्ग्रहः ॥ (तुलजामहाराजः)

RĀJADHARMASĀRASAṄGRAHAḤ—

TULAJĀMAHĀRĀJAḤ.

B. L. 276 P. 187 De. Gr-2800. Complete.

Beginning:

राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।

संभवश्च यथा तस्य सिद्धिश्च परमा यथा ॥ १ ॥

End:

इत्येवं मानवं शास्त्रं भृगुप्रोक्तं पठेद्विजः ।

भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिम् ॥ १२७ ॥ १२

Colophon:

श्रीमद्भोसलकुलतिलकः श्रीमन्महाराजाधिराजतुलजमहाराजविरचिते

धर्मसारसंग्रहे एकान्तसभाविचारो नाम द्वादशोऽध्यायः ॥ १२ ॥

श्रीरस्तु ॥

18751	B. L.	277	P.	156	De.	Complete.
18752	,,	9263	Pl.	244	Te.	,,
18753	,,	278	P.	63	De.	Incomplete.
18754	,,	278 a	,,	69	,,	,,
18755	,,	9364	Pl	134	Te.	,,

18756 ॥ राजनीतिः ॥

RĀJANĪTIḤ.

B. L. 275 P. 39 De. Gr. 700 Incomplete.

Beginning:

...सम्यक् सर्वारं जयति प्रजाः ।

असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ।

यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ॥

End:

एवं सर्वानिमात्राज्ञा + परमां गतिम् ॥

18757 ॥ लौकिकन्यायसङ्ग्रहः ॥ (रघुनाथः)

LAUKIKANYĀYASAṄGRAHAḤ—RAGHUNĀTHAḤ

18757 B. L. 6327 P. 99 De. Gr.-2000 Complete.

Beginning:

यत्कीर्तिप्रभयासुशुक्लभुवने मायाप्रभावैः प्रभो-
नीलाद्यैर्जनिता प्रतीतिरचना द्यौः संवृता शोभते ।
यच्छिष्योडुगणैः स मे गुरुरहो हार्दान्धकारापहः
श्रीमद्रामदयालुरिन्दुरमलो मोदाय भूयात्सदा ॥

End:

तुष्यत्त्विति न्यायः प्रासङ्गिकः ॥

Colophon:

इति सकलकल्याणगुणभूरुहारण्यश्रीनानकसद्वंशसन्मौक्तिकश्रीरामदयालुशिष्येण सोमवंशीयविन्दरायकुलोत्तंसश्रीगुलाबरायवर्मात्मजेनोदासीनावस्थेन रघुनाथेन विरचिते लौकिकन्यायसंग्रहे प्रमेयनिरूपणपरः पूर्वभागः समाप्तः ॥ मासानां मासोत्तममासे शुक्लपक्षे द्वितीयायां भौमवासरे शुभं भूयात् ॥

R:—The author's geneology is given as follows:—

Vindarāya
|
Gulabrāyavarma
|
Raghunatha

He mentions his guru one Rāmadayālu of Nānak family Obviouly he is a North Indian.

18758 ॥ विदुरनीतिः ॥ (व्यासः)

VIDURANĪTIḤ—VYĀSAḤ.

18758	B. L.	5123	P.	61	De.	Complete.
18759	,,	5124	,,	45	,,	,,
18760	,,	12361	,,	31	,,	,,
18761	,,	5125	,,	7	,,	Incomplete.
18762	,,	5032	,,	2	,,	Fragment.

18763 ॥ कृष्णार्जुननीतिः ॥ (व्यासः)

KṚṢṆĀRJUNANĪTIḤ—VYĀSAḤ.

B. L. 5131 P. 4 De. Complete.

Subject: Kṛṣṇārjunanītiḥ.

" भ्रातृवधविषयः "

18764 ॥ नारदनीतिः ॥ (व्यासः)

NĀRATANĪTIḤ—VYĀSAḤ.

B. L. 5130 P. 6 De. Complete.

18765 आह्निकम्—कमलाकरः

ĀHNIKAM—KAMALĀKARAḤ.

B. L. 281 P. De. Gr.-1450. Incomplete.

Beginning:

विश्वनाथं भवानीं च ढुन्ढिराजं च भैरवम् ।
श्रीमाधवं दण्डपाणिं काशीं गङ्गां नमाम्यहम् ॥ १ ॥
दूरीभवन्ति दुरितान्यपयान्ति पापाः
प्रादुर्भवन्ति विभवाः परमाश्च हृद्याः ।

संपद्यते विविधसंपदपैति मोहः
श्रीरामचन्द्रपदपद्मनमस्क्रियातः ॥ २ ॥
रामं कुलपतिं नत्वा पुण्डरीकात्मजं गुरुम् ।
आह्निकस्य प्रयोगं च सविधिं प्रवदाम्यहम् ॥ ३ ॥

End:

एवं संध्यायन्तरं नित्यहोमः । ब्रह्मचारि चाग्निकार्यं
कृत्वाध्ययनं कुर्यात् ॥

This is a separate work on daily Hindu rituals by Kamalākara of Nirṇayasindhu fame.

18766	B. L.	282	P.	110	De.	Complete.
18767	M. S. No. 16352		,,	85	,,	Incomplete.
18768	B. L.	283	,,	51	,,	,,
18769	P. A.	134	,,	12	,,	,,

18770 ॥ आह्निकम् ॥ (दिवाकरभट्टः)

ĀHNIKAM—DIVĀKARABAṬṬAH.

18770	B. L.	284	P.	36	,,	Complete
18771	,,	285	,,	8	,,	,,

18772 ॥ आह्निकम् ॥ (रघुनाथः)

ĀHNIKAM—RAGUNĀTAH.

B. L. 320 P. 68 De Gr-400. Complete

Beginning:

अथ आह्निकं लिख्यते तत्र प्रभाते उत्थाय माता
पिता गुर्विष्टदेवान् मनसा नत्वा तदहःकर्तव्यं विचार्य,

End:

इदं प्रभातोत्थानादिशयनान्तं कर्म प्रतिदिनं कुर्यात् ।

इति श्री रघुनाथेन भट्टमाधवसूनुना ।
कृता निबन्धान्प्रेक्ष्याशु समूलाह्निकपद्धतिः ॥

Colophon:
इति श्रीमदुपाध्यायभट्टमाधवात्मजभट्टरघुनाथवर्णित आह्निकप्रयोगः संपूर्णः ॥

18773	B. L.	321	P.	9	De.	Complete.
18774	„	328	„	19	„	„
18775	„	329	„	30	„	„
18776	„	330	„	19	„	„
18777	„	331	„	21	„	„
18778	G. K. D.	3	„	22	„	„
18779	„	4	„	24	„	„
18780	B. L.	374	„	38	„	„
18781	„	332	„	5	„	„

R:—G K. D. 18778 After the colophon is given:—
'शके १५९४ परीधाविसंवत्सरे आश्विनमासे कृष्णपक्षे प्रतिपद्यां शुभतिथौ भृगुवासरे इदं अह्निकाख्यं पुस्तकं पुण्डरीकभट्टसूनुना लिखितम् ॥ शुभमस्तु सर्वजगताम् । श्रीरेणुका । लेखकपाठकयोः शुभं भवतु ॥

18782 ॥ तन्त्रसारसङ्ग्रहव्याख्यानम् ॥ (शेषः)

TANTRASĀRASAṄGRAHAVYĀKHYĀNAM—ŚEṢAḤ.

B. L. 6001 P. 117 De. Gr-2950 Incomplete.

Beginning:

लक्ष्मीनारायणं पूर्णज्ञानानन्दादिसद्गुणम् ॥
मन्त्रवर्णाभिधेयं च वन्दे ब्रह्मादिवन्दितम् ।
छलारिनरसिंहार्यसत्यनिध्याह्वयौ गुरू ॥
विद्यामन्त्रोपदेष्टारौ वन्देऽभिमतसिद्धये ॥ २ ॥

बहुशबहुटीकास्मो बुभ्यारोहार्थमञ्जसा ।
मध्वोक्ततन्त्रसारार्थसंग्रहः क्रियते मया ॥ ३५ ॥

End:

उन्नतकर्मशक्तिं उत्कृष्टकार्यकरणे समर्थम् ॥ ७५ ॥
वायोरेवमपरान्मन्त्रा... ॥

Subject: Tantrasāravyākhyā—a commentary on Ānandatīrtha's Tantrasāra.

18783 ॥ आह्निकम् ॥ (बलदेवः)

ĀHNIKAM—BALADEVA.

B. L. 286 P. 6 De. Gr.-110 Complete.

Beginning:

वैशम्पायन उवाच—

अत्राश्चर्यात्मकं स्तोत्रं आह्निकं जयतां वर ।
यं जप्त्वा तु नृपश्रेष्ठ सायं पूतात्मतां व्रजेत् ॥
कीर्तितं बलदेवेन विष्णुना चैव कीर्तितम् ।
धर्मकामैश्च मुनिभिः ऋषिभिश्चापि कीर्तितम् ॥

End:

श्रद्दधानो दयापूतः प्रपठेदात्मवान्नरः ।
सर्वपापविशुद्धात्मा गतिं च लभते शुभाम् ॥

18784 ॥ आह्निकम् ॥

ĀHNIKAM.

B. L. 322 P. 30 De. Gr.-450 Incomplete.

Beginning:

आदित्यस्योदयात्पूर्वं मुहूर्तद्वितये स्थिते ।
उत्थाय धौताङ्घ्रिकरः कृतभस्मावकुण्ठनः ॥
हृदि साक्षान्यसमयी चिन्तयेत्परमेश्वरम् ।
विशिष्टसमयी बिन्दौ मूर्ध्नि निर्वाणदीक्षितः ॥

End:

आकर्षणे तु न्यग्रोधे पाटलेस्तम्भने तथा ।
भेदनेऽश्वत्थफलके मारणोदुम्बरेऽपि च ॥

18785	B. L.	325	P.	180	De.	Complete.
18786	,,	323	,,	34	,,	Incomplete.
18787	,,	326	,,	46	,,	,,
18788	,,	327	,,	98	,,	,,
18789	,,	344	,,	4	,,	,,
18790	,,	9232 d	Pl	10	Te.	,,
18791	,,	9226(19)	,,	6	Gr.	,,
18792	,,	9451	,,	344	,,	,,
18793	,,	9454	,,	16	,,	,,
18794	Ms. No.	16853	,,	6	,,	,,
18795	J. L.	1391	P.	29	De.	,,
18796	T. S.	1071	,,	3	,,	Fragment.
18797	J. L.	1392	,,	66	,,	(Babvruca.)

R:—18785 After the colophon is seen :—

शके १५३४ परिधाविनामसंवत्सरे फाल्गुनशुद्ध १५ बुधौ । लेखकपाठकयोः शुभं भवतु ॥ श्रीः ॥

18798 ॥ प्रायश्चित्तकुतूहलम् ॥ रघुनाथः

PRĀYAŚCITTAKUTŪHALAM—RAGHUNĀTHA.

J. L. 1393 P. 40 De. Gr.-1000 Complete.

2nd Pariccheda.

Beginning:

स्मृतः स्मृतिं यच्छति यो जनानां
शतं गतानामपि योजनानाम् ।
आराध्य भक्त्या तमनन्तदेव
मथ ब्रुवे दुश्शमनन्तदेव ॥

उक्तानि श्रौतविध्यपराधे प्रायश्चित्तानि । स्मार्तेऽधुना वक्ष्यामः । स्मार्तत्वं च स्मृत्याद्यनुमितश्रुतिगम्यसकलाङ्गकलापशालित्वम् ।

End:

अवादीत्थमनन्तेन प्रायश्चित्तकुतूहलम् ।
प्रीणातु भगवांस्तेन स्मृतिगम्यो गुहाशयः ॥

Colophon:

इति श्रीमद्वारिधिवेलावलयितेलावलयवर्तिविद्वन्मण्डलीमण्डनायमानश्रीमदनन्तदेवोदयस्य रघुनाथविदुषः कृतौ प्रायश्चित्तकुतूहले स्मार्तप्रायश्चित्तक्रमोनाम द्वितीयः परिच्छेदः ॥

18799 ॥ प्रायश्चित्तप्रकरणम् ॥

PRĀYAŚCITTAPRAKARAṆAM.

18799	B. L.	304	P.	19	De.	Complete.
18800	,,	306	,,	16	,,	,,

18801 ॥ प्रायश्चित्तविवेकः ॥ (शूलपाणिः)

PRĀYAŚCITTAVIVEKAḤ—ŚŪLAPĀṆIḤ.

18801	B. L.	293	P.	175	De.	Complete.

18802	B. L.	299	P.	142	De.	Complete.
18803	,,	305	,,	7	,,	Incomplete.

18804 ॥ प्रायश्चित्तसमुच्चयः ॥ (शिवः)

PRĀYAŚCITTASAMUCCAYAḤ—ŚIVAḤ.

B. L. 301 P. 74 De. Gr.-1500 Wants end only.

Beginning:

श्रीमदामर्दकस्थानगुरुवंशसमुद्भवम् ।
दुर्वाससमृषिं वन्दे तन्मुख्यांश्च गुरूनुमः ॥
स्थापकेशानसर्वेशपण्डितोत्तुङ्गशंकरान् ।
सोमेशानादिसर्वात्मशिवाघोरशिवान्तिमान् ॥
साधकाद्यैरनुष्ठेयमाचारं शिवभाषितम् ।
तद्विपत्तौ तदाज्ञाया लङ्घने यात्यधस्ततः ।
तेषां तत्परिहारार्थं प्रायश्चित्तं शिवोऽवदत् ॥

End:

शिकारं शिवरूपं तु वकारः शक्तिरुच्यते ।
यकारमात्मरूपं च नकारं ग्रन्थिरूपकम् ॥
मकारं मलरूपं च इत्यर्थः पंचवर्णकम् ॥
श्रीचिन्तामणिविनायकाय नमः

18805 ॥ स्मार्तप्रायश्चित्तम् ॥ (नारायणभट्टः)

SMĀRTAPRĀYAŚCITTAM—NĀRĀYAṆABHAṬṬAḤ.

T. S. 290 P. 28 De. Gr.-700 Complete.

Beginning:

अथौपासनाग्निमतो नैमित्तिकानि प्रायश्चित्तान्युच्य-

न्ते । य आहिताग्नेर्धर्मः स औपासनिकस्य त्विति पञ्चहो-
मादिप्रकरणे स्मृत्यर्थसार उक्तत्वात् तथैव पारिजातादि-
भिर्धमलजननादौ गृहदाहादौ च ऐतरेयब्राह्मणोक्त इष्टि-
स्थाने चरवः पूर्णाहुतयो वा इत्युक्तम् ॥

End:

मललेपिनां तु तैजसमृण्मयाश्ममयानां सर्वेषामपि भ-
स्मना मृदा वा संघृष्य जले प्रक्षालनाच्छुद्धिरिति ॥

Colophon:

इति नारायणभट्टकृते प्रयोगसारे स्मार्ताग्निप्रायश्चित्तानि समाप्तानि ॥

प्रायश्चित्तप्रसादेन प्रायश्चित्तस्थितिः शुभा ।
ज्ञातिभिर्ज्ञातितत्त्वार्थैः कार्याकाय...सुधीः ॥

श्रीसाम्बाय परस्मै ब्रह्मणे नमः ।

18806 ॥ स्मार्तप्रायश्चित्तोद्धारः ॥ (दिवाकरभट्टः)

SMĀRTAPRĀYAŚCITTODDHĀRAḤ—

DIVĀKARABHAṬṬA.

B. L. 300 P. 74 De. Gr.-330 Complete.

Beginning:

श्रीगणेशाय नमः । अथ स्मार्तप्रायश्चित्तानि तन्यन्ते ।
तत्रादावावश्यकविशेषो नित्यप्रायश्चित्तानि च वक्ष्यन्ते ।
तत्रादौ शौचमाह मनुः ।

End:

प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ इति ॥

Colophon:

इति श्रीमत्काळोपनामकभट्टरामेश्वरात्मजभट्टमहादेवाद्विजवर्यसूनुभट्टदिवाकरविरचितस्मार्तप्रायश्चित्तोद्धारे संक्षिप्तप्रयोगरूपेण नित्यनैमित्तिकप्रायश्चित्तानि कारिकाद्युक्तनिरूपितानि ।

दिवाकरेण रचिता स्मार्तनिष्कृतिपद्धतिः ।
गुणगृह्यैः बुधैः सम्यगादरेण विभाव्यताम् ॥

18807	B. L.	302	P.	31	De.	Complete.
18808	,,	303	,,	31	,,	,,
18809	G. K. D.	6	,,	74	,,	,,

R.—18808 On the last page is given—

शके १६१० (1610) विभवसंवत्सरे पौषशुद्ध १० तद्दिने कूर्परग्रामेभूक्ककचसन्निधौ पश्चिमवाहिन्यां गङ्गामभिवन्द्य इदं पुस्तकं शुक्लयजुषा माधवात्मजगोपालेन लिखितम् । श्रीलक्ष्मीनृसिंहाय नमः ।

शाके पञ्चक्ष्मषट्पृथ्वीचाब्दे विभवसंज्ञके ।
पौषशुक्लदशम्यां वै गोपालेनालिखत् स्वयम् ॥

18810 ॥ स्मार्तप्रायश्चित्तम् ॥

SMĀRTAPRĀYAŚCITTAM.

T. S. 227 P. 170 De. Gr.-2500. Incomplete.

Beginning:

...अष्टशतं चैव प्राणायामत्रयं तथा ।
प्रायश्चित्तमिदं प्रोक्तं............ ॥

End:

रात्रौ चेत् नाभेरूर्ध्वं स्नानं । नाभेरधः प्रक्षालनं... ॥

Colophon: (sheet No. 170)

इति स्मृत्यर्थसारे द्रव्यशुद्धिः ॥ प्रायश्चित्तविषयः ॥

This and the following Mss. are works dealing with the same subject but appears to be portions of bigger works.

18811	B. L.	9212b	Pl.	9	Gr.	Incomplete.
18812	,,	9232a	,,	9	Te.	,,
18813	,,	9232b	,,	11	,,	,,
18814	,,	9353	,,	9	Gr.	,,
18815	,,	9458	,,	9	,,	,,

18816 ॥ अण्वाक्षेपसारः ॥ (तिम्मणाचार्यः)

ANVĀKṢEPASĀRAḤ—TIMMAṆĀCĀRYAḤ.

